वेदान्त ३८२

BENARES SANSKRIT SERIES;

A

COLLECTION OF SANSKRIT WORKS

EDITED BY THE

PANDITS OF THE BENARES SANSKRIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

R. T. H. GRIFFITH, M. A., C. I. E.

AND

G. THIBAUT, Ph. D.

No. 112.

ब्रह्मसूत्रदीपिका

श्रीमच्छङ्करानन्दभगवद्धिरचिता ।

तथा—

तत्त्वानुसन्धानं नाम वेदान्तप्रकरणम्

प. प. श्रीमन्महादेवानन्दसरस्वतीरचितम् ।

BRAHMASÛTRADÎPIKÂ

BY ŜRÎ ŜANKARÂNANDA,

And TATTVANUSANDHÂNA

BY ŜRÎ MAHÂDEVÂNANDASARASWATÎ,

EDITED BY

Râma Ŝâstrî Tailanga,

PROFESSOR, GOVT. SANSKRIT COLLEGE, BENARES.

Fasciculus II.

BENARES:

Published by the Proprietors Messrs. Braj B. Das & Co.,

AND SOLD BY H. D. GUPTA,

Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidyâ Vilâs Press & Tara Printing Works,

BENARES.

1906.

Registered u... (ALL Rig...

सूचीपत्रम् ।

गणपाठः	०	४	०
गोलप्रकाशः	२	८	०
गंगालहरी	०	१	०
गुरुसारणी	०	४	०
जातकतत्त्वम्	०	१२	०
तत्त्वदीप	०	१	०
तर्कसंग्रहः	०	१	६
दत्तकमीमांसा	०	८	०
धर्म्मशास्त्रसंग्रहः	०	१	६
धातुपाठः (शिला -))	०	२	०
धातुरूपावली	०	२	०
नैषध चरित नारायणी टीका टाइप	४	०	०
परिभाषापाठः	०	१	०
पाणिनीयशिक्षा भाष्यसहिता	०	२	०
प्रथम परीक्षा	०	२	०
प्रथमपुस्तक हिन्दी	०	१	०
प्रश्नभूषणम् (प्रश्न विचार का बहुत उत्तम ग्रन्थ)	०	४	०
बीजगणितम् (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	८	०
मनोरमा शब्दरत्नसहिता (टाइप)	९	०	०
लघुकौमुदी टिप्पणीसहिता	०	४	०
लघुकौमुदीभाषाटीका	४	०	०
लक्षणावली	०	२	०
लीलावती (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	०	०
वसिष्ठसिद्धान्तः	०	१	६
विष्णु सहस्रनाम	०	१	०
शब्दरूपावली	०	१	६
शृङ्गार सप्तशती	१	८	०
समासचक्रम्	०	१	०
समासचन्द्रिका	०	१	०
सरस्वतीकण्ठाभरणम्	३	०	०
साङ्ख्यचन्द्रिका टिप्पणीसहिता	०	८	०
साङ्ख्यतत्त्वकौमुदी	०	६	०
सिद्धान्तकौमुदी	३	०	०
सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता	३	०	०
उपसर्गवृत्ति	०	१	०
क्षेत्रकौमुदी	०	६	०
क्षेत्रसंहिता	२	०	०

वेदान्त ३८२

पूर्वाधिकरणे शरीरपरित्यागाऽवसरे एव सुकृतदुष्कृतयोः परित्यागो निमित्तनैमित्तिकाऽविरोधेनेत्युक्तम्, अत्रापि सगुणनिर्गुणब्रह्मप्रतिपादकवाक्यानां ब्रह्मप्रतिपादकत्वाऽविरोधेन निर्गुणेष्वपि गतेरुपसंहार इति दृष्टान्तेनाक्षिप्य समाधत्ते—

गतेरर्थवत्त्वमुभयथा ऽन्यथा हि विरोधः॥२९॥

गतेर्देवयानस्य पथो ऽर्थवत्त्वं प्रयोजनवत्त्वम् उभयथा सगुणे निर्गुणे च व्यवस्थया। कुतः? हि यस्मात् अन्यथा निर्गुणे ऽपि चेद् गतिः 'पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैती'त्यादिना विरोधः स्यात्॥ २९॥

किमिदानीं श्रुतिविरोधादनुपपन्नमध्याहर्तव्य?मित्यत आह—

उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत्॥३०॥

उपपन्नो ऽयं गतेरुभयथाभावः। कुतः? तल्लक्षणाऽर्थोपलब्धेः। तस्य गतेर्लक्षणभूतः कारणभूतो यो ऽर्थः प्रयोजनं पर्यङ्काऽऽरोहणादि पर्यङ्कविद्यादौ सगुणे उपलभ्यते न तु निर्गुणे। तत्र निदर्शनं लोकवत्। यथा ग्रामादिप्राप्तौ मार्गस्याऽर्थवत्त्वं तद्वत्॥ ३०॥

पूर्वाधिकरणे सगुणनिर्गुणविद्यासु व्यवस्था गतेरुक्ता, एवं सगुणास्वपि गतेर्व्यवस्था स्यादिति दृष्टान्तेनाक्षिप्याऽपवदति—

अनियमः सर्वेषामविरोधः शब्दाऽनुमानाभ्याम्॥३१॥

सर्वेषां सगुणानामुपश्रुतगतीनामपि गतेरनियमो ऽविशेषः। प्रकरणस्य नियामकस्य विरोधे कुतो ऽनियम? इत्यत आह—अविरोधः। न विरोधः प्रकरणे। कुतः? शब्दाऽनुमानाभ्याम्। शब्दः श्रुतिः 'ये चेमे ऽरण्ये श्रद्धा तप इत्युपासते' इत्यविशेषेण गतिमाह। अनुमानं स्मृतिः 'शुक्लकृष्णे गती ह्येते जगत' इत्यादिका॥ ३१॥

पूर्वाधिकरणे सगुणविद्यासु गतिः सर्वत्रोक्ता, ततः पूर्वं निर्गुणासु नेत्युक्तं, सो ऽयं नियमो ऽनुपपन्नो, ज्ञानिनामपि व्यासादीनां शरीरैश्वर्यादिदर्शनात्ततो न निर्गुणज्ञानेन विदेहकैवल्यं सगुणेन क्रममुक्तिरित्याक्षिप्य समाधत्ते—

११०८३.

यावदधिकारमवस्थितिराधिकारिकाणाम् ॥ ३२ ॥

आधिकारिणां परमेश्वरनियमे वर्तमानानां व्यासादीनामारब्धफलेन कर्मणा कल्पभागेनाऽवस्थितिरवस्थानं न तु ब्रह्मज्ञानस्य पाक्षिकफलत्वेनाऽफलत्वेन वा । तर्हि कियन्तं काल?मित्यत आह-यावदधिकारम् । अधिकारकर्म यावत् तावदेव, न तूपरिष्टात् ॥ ३२ ॥

पूर्वाधिकरणे आधिकारिकाणां प्रारब्धकर्मण एव शरीरान्तरसम्भवात् न कर्मान्तरस्य निमित्ततेत्युक्तम्, एवमिहापि तत्प्रकरणपठितनिषेधत एवोपलक्षणतया सर्वत्र प्रपञ्चनिषेधे सिद्धे न शाखान्तरीयनिषेधानां शाखान्तरे ब्रह्मप्रमितिदृष्टान्तेन उपसंहार इत्याक्षिप्य समाधत्ते—

अक्षराधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ॥ ३२ ॥

अक्षराधियामस्थूलत्वादिबुद्धीनां चाऽन्यत्राऽवरोधः स्वीकारः स्यात् । कुतः ? विशेषधर्मनिराकरणस्य सामान्यं, तस्य ब्रह्मणः प्रतिपाद्यस्य एकस्य भावः सत्त्वं च सर्वत्र ताभ्याम् । औपसदवदिति निदर्शनम् । यथा जामदग्न्ये अहीने पुरोडाशिनीषूपसत्सु चोदितासु पुरोडाशप्रदानमन्त्राणा'मग्नेर्वैहोत्रं वेरध्वर'मित्यादीनामुद्गातृवेदोत्पन्नानामध्वर्युभिः सम्बन्धो भवति अध्वर्युकर्तृकत्वात् पुरोडाशप्रदानस्य प्रधानतन्त्रत्वाच्चाऽङ्गाना,मेवमिहाप्यक्षरतन्त्रत्वात् तत्तद्विशेषणानां यत्र क चिदुत्पन्नानामक्षरेण सर्वत्राऽभिसम्बन्ध इत्यर्थः । तदुक्तं प्रथमे काण्डे 'गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोग' इत्यत्र शाबरमुदाहरणं वारवन्तीयादिसाम्नां यजुर्वेदविनियोगस्य श्रवणात् 'उच्चैः साम्ने'त्युत्पत्तिविधेर्गुणत्वा'दुपांशु यजुषे'ति विनियोगविधेर्मुख्यत्वात्तयोर्व्यतिक्रमे विरोधस्य तदर्थत्वात् विनियोगविध्यर्थत्वादुत्पत्तिविधेर्मुख्येन यजुष उपांशुस्वरेण वेदस्य च वारवन्तीयादिसाम्नः संयोग इत्यत्र सम्बन्ध इति योज्यम् । पूर्वं शाबरमुदाहरण,मतिरोहितं तु तत् ॥ ३३ ॥

पूर्वाधिकरणे प्रतिपाद्यब्रह्मैक्यप्रत्यभिज्ञानात् विद्यैक्ये ऽक्षराधि-

यामुपसंहार उक्तः, इह प्रतिपाद्यभेदाद्विद्याभेद इति प्रत्युदाहरणेनाक्षिप्य समाधत्ते—

इयदामननात् ॥ ३४ ॥

'द्वा सुपर्णे'त्यत्र 'ऋतं पिबन्ता'वित्यत्र च विद्याया ऐक्यम् । कुतः? इयत्तापरिच्छिन्नस्य द्वित्वसंख्योपदेशस्योभयत्रामननात् ॥३४॥

पूर्वाधिकरणं 'पिबन्ता'वित्यस्य लाक्षणिकत्वमुपपाद्य मन्त्रद्वयेपि भोक्तृपरत्वेनार्थैक्यात् विद्यैक्यमुक्तम्, इहाऽर्थैक्येपि न विद्यैक्यमिति रूपाऽभेदमभ्यासेन प्रत्युदाहरणेनाक्षिप्य समाधत्ते—

अन्तरा भूतग्रामवत्स्वात्मनः ॥ ३५ ॥

उषस्तिकहोडब्राह्मणयोर्विद्यैकत्वम्। कुतः? आत्मनोऽन्तरा सर्वान्तरत्वेनोभयत्र पाठादिति शेषः। भूतग्रामवदिति निदर्शनं व्यतिरेके । यथा भूतग्रामस्य पृथिव्यादेर्न सर्वान्तरत्वं तद्वदात्मन आत्मनि सर्वान्तरत्वं न स्यादेकस्याऽन्वये तु यथा 'एको देव' इत्यादौ सर्वान्तरत्वमेकस्य तद्वत् ॥ ३५ ॥

अन्यथा भेदाऽनुपपत्तिरिति चेन्नोपदेशान्तरवत् ॥ ३६ ॥

अन्यथा विद्यैकत्वे आत्मना भेदाऽनुपपत्तिरिति चेत्तन्न । यथा ताण्डिनां 'तत्त्वमसी'ति नवकृत्व उपदेशभेदो विद्यैक्ये तद्वदत्रापि स्यात् ॥ ३६ ॥

पूर्वाधिकरणे अभ्यास आदरार्थ उक्तः, उत्तरत्रापि तथेत्याक्षिप्य समाधत्ते—

व्यतिहारो विशिंषन्ति हीतरवत् ॥ ३७ ॥

'तद्यो ऽहं सो ऽसौ यो ऽसौ सो ऽह'मित्यादावीश्वरबुद्धिवदीश्वरे स्वात्मबुद्धिरिति व्यतिहारेण बुद्धिद्वयं करणीयम् । अनेकबुद्धिकरणे निदर्शनमितरवत् । यथा सर्वात्मादिबुद्धिः क्रियते तद्वत् । कुतः? हि यस्मात् 'त्वं वा ऽहमस्मि अहं वै त्वमसी'ति विशेषयन्त्याऽम्नातारः ॥ ३७ ॥

पूर्वाधिकरणे जीवब्रह्मणोरितरेतरात्मत्वं निर्देशभेदात् द्विरूपा मतिः कर्तव्येत्युक्त,मेवमिहापि 'जयतीमांल्लोका'निति 'हन्ति पाप्मान'-मिति च फलभेदनिर्देशाद्विद्याभेद इति दृष्टान्तेनाक्षिप्य समाधत्ते—

सैव हि सत्यादयः ॥ ३८ ॥

'स यो हैतं महद्यक्ष'मित्यादिना 'तद्यत्तत्सत्यमसौ स आदित्य' इत्यादिना 'यश्चाऽयं दक्षिणेक्षन्पुरुष' इत्यादिना च योक्ता सा एकैव। हि यस्मात् 'तत्सत्य'मिति प्रकृताकर्षणादयः सत्यादयः सर्वे गुणा उभयत्रोपसंहर्तव्याः ॥ ३८ ॥

पूर्वाधिकरणे 'तत्सत्य'मिति प्रकृताकर्षणेन रूपाऽभेदात् गुणोपसंहार उक्तः, इह तु रूपाऽभेदाद् गुणाऽनुपसंहार इति प्रत्युदाहरणेनाक्षिप्य समाधत्ते—

कामादीतरत्र तत्र चाऽऽयतनादिभ्यः ॥ ३९ ॥

कामादि सत्यकामादि दहरविद्यायां श्रूयमाणमितरत्र 'यो ऽयं विज्ञानमय' इत्यादिबृहदारण्यकोक्ते उपसंहर्तव्यं, तत्र च यद्वशित्वादिकं तदपि छान्दोग्योक्ते दहरे उपसंहर्तव्यम्। कुतः? आयतनादिभ्यः ॥ ३९ ॥

पूर्वाधिकरणे उपासनीयेपि स्तुत्यर्थत्वेन गुणाऽलोप इत्युक्तं, तद्वदिहापि प्राणाऽग्निहोत्रस्य—

आदरादलोपः ॥ ४० ॥

न लोपः, 'पूर्वोऽतिथिभ्यो ऽश्नीया'दित्यादेर्जाबालानामादरादिति पूर्वपक्षः ॥ ४० ॥

राद्धान्तमाह—

उपस्थिते ऽतद्वचनात् ॥ ४१ ॥

'तद्यद्भक्तं प्रथममागच्छे'दित्यत्र भोजने सति भक्तेन प्राणाऽऽहुतीनां विधानात् भोजनाऽलोपे ऽपि प्रत्यगागतमुपस्थितं यद्भक्तं द्रव्यम् अतो ऽस्माद्भक्तद्रव्यात् प्राणाऽग्निहोत्रस्य निष्पत्तिः, न त्व-

न्यस्मात्कस्माच्चित्, 'तद्यद्भक्त'मित्यनेन तस्याऽग्निहोत्रद्रव्यवचनत्वात् । अतो भोजनलोपे ऽपि न लोपो ऽग्निहोत्रस्य ॥ ४१ ॥

पूर्वाधिकरणे नित्यभोजनाश्रितप्राणाऽग्निहोत्रस्य नित्यत्वमुक्त,मेवं च नित्याऽङ्गाऽवबद्धोपासनानां नित्यत्वमिति दृष्टान्तेनाक्षिप्य समाधत्ते—

तन्निर्धारणाऽनियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् ॥ ४२ ॥

तेषां कर्मगुणयाथात्म्यनिर्धारणानामुद्गीथरसतमत्वादीनां न नित्यवन्नियमः । न सर्वदा कर्मण्यनुष्ठीयमाने ऽनुष्ठानम् । कुतः ? तद्दृष्टेः । तस्याऽनियमस्य 'तेनोभौ कुरुत' इत्यादिदृष्टेरवगमात् । ननूभयोः करणे किमयमेव हेतुरित्यत आह–हि यस्मात् पृथक् फलम् अप्रतिबन्धः अतिशयः 'यदेव विद्यया करोती'त्यादिना श्रूयते, अतः फलभूमाऽर्थिन उपासनानि गोदोहनादिवत्—

पूर्वाधिकरणे फलभेदात् कर्माऽङ्गानां नित्याऽनित्यादिनिरूपणेन प्रयोगप्रभेद उक्तः, इह तु वायुप्राणयोस्तत्त्वाऽभेदात्प्राप्तिलक्षणफलैक्यात् उपासनप्रयोगैक्यमिति प्रत्युदाहरणेनाक्षिप्य समाधत्ते—

प्रदानवदेव तदुक्तम् ॥ ४३ ॥

वाजसनेयके 'वदिष्याम्येवाऽह'मित्यादिना वागादिभ्यः प्राणो ऽधिको ऽवधारितो 'ऽध्यात्ममाधिदैवं च ज्वलिष्याम्येवाह'मित्यग्न्यादिभ्यो वायुः, एवं छान्दोग्येपि संवर्गविद्यायां वायुप्राणाववधारितौ विद्याया ऐक्यमपि, तत्रैतौ वायुप्राणौ भिन्नस्वरूपौ न तु विद्याभेदौ यथैकस्मिन्नग्निहोत्रे सायंप्रातः प्रवृत्तिभेद इत्येतस्मिन्नर्थे निदर्शनं प्रदानवत् । यथा त्रिपुरोडाशिन्यामिष्टौ 'इन्द्राय राज्ञे इन्द्रायाऽधिराजाय इन्द्राय स्वाराजे' इत्यत्र राजादिरूपभेदात् पृथक् प्रदानं तद्वद्वायुप्राणयोरपि भेदः । तदुक्तं पूर्वमीमांसायां 'सङ्कर्षो ऽनन्ता वा देवता पृथग्ज्ञानात्' । सङ्कर्षः सर्वेषामभिगमयन्नवद्यतीत्यस्मादेकहेलया परित्यागः प्राप्तस्तं परित्यागं वाशब्दो वारयति । पृथग्ज्ञानात् राजादिगुणानाम् ॥ ४३ ॥

पूर्वाधिकरणे एकप्रयोगसम्भवाद्वायुप्राणौ भेदेन ज्ञेयावित्युक्त, मिह तु मनश्चिदादीनां कर्माङ्गत्वं नैकप्रयोगाऽङ्गत्वमिति प्रत्युहाहरणेनाक्षिप्य समाधत्ते—

लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ॥ ४४ ॥

वाजसनेयके ऽग्निरहस्ये मनो ऽधिकृत्य 'षट्त्रिंशत्सहस्राण्यपश्यदात्मनो ऽग्नीनिमान्मनोमयान्मनश्चित' इत्यादिना आम्नाता अग्नयः स्वतन्त्रा न क्रियाऽनुप्रवेशिनः । कुतः ? 'तद्यत्किं चे'त्यादेर्लिङ्गस्य भूयस्त्वादधिकत्वात् । सन्ति लिङ्गानि तथाप्यग्नेः प्रकरणात् कर्माऽनुप्रवेशिन इत्यत आह—तद्धि बलीयः । हि यस्मात् लिङ्गं प्रकरणाद् बलीयः । तदप्युक्तं पूर्वस्मिन्काण्डे 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षा'दिति । एकद्वित्रिचतुःपञ्चक्षणविलम्बात् परस्य परस्य दौर्बल्यं पूर्वस्य प्राबल्यमिति ॥ ४४ ॥

आक्षिपति पूर्ववादी पूर्वाधिकरणे—

पूर्वविकल्पः प्रकरणात् स्यात् क्रिया मानसवत् ॥ ४५ ॥

मनश्चिदादयः क्रियैव स्यात् कथं ? पूर्वस्मिन् क्रियामये ऽग्नौ विकल्पः सङ्कल्पविशेषो ऽभिधीयते यतः । तदपि कुतः ? क्रियामयस्याऽग्नेः प्रकरणात् । विरूपस्य तत्प्रकरणात् क्रियारूपत्वं क दृष्ट?मित्यत आह—मानसवत् । यथा दशरात्रस्य दशमे ऽहन्यपिवाक्ये पृथिव्याः पात्रे समुद्रस्य सोमस्य प्रजापतिदेवतायै गृह्यमाणस्य ग्रहणाऽऽसादनहरणोपह्वानभक्षणानि मानसान्येवाऽऽम्नायन्ते, स च मानसो ऽपि ग्रहविकल्पः क्रियाप्रकरणात्क्रियाशेषः एवमप्यग्निविकल्प इत्यर्थः ॥ ४५ ॥

केवलप्रकरणं कथं लिङ्गं बाधते? इत्यत आह—

अतिदेशाच्च ॥ ४६ ॥

'तेषामेकैक एतावान् यावानसौ पूर्व' इत्यतिदेशस्तस्मादपि॥४६॥

परिहरति सिद्धान्ती—

विद्यैव तु निर्द्धारणात् ॥४७॥

तुशब्दोऽग्नीनां क्रियारूपत्वं वारयति। किं तर्हि?विद्यैव। कुतः? विद्या चित एवेति निर्धारणात् ॥ ४७ ॥

नन्वसहकृतं निर्धारणं न बाधकं प्रकरणस्येत्यत आह—

दर्शनाच्च ॥ ४८ ॥

लिङ्गानामिति शेषः। चकारः सहकारिणोऽनपेक्षामप्याह। लिङ्गानि चोक्तानि लिङ्गसूत्रे ॥ ५८ ॥

लिङ्गमपि कचिद्बाधकं न प्रकरणस्येत्यत आह—

श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥४९॥

न बाधः प्रकरणेन लिङ्गबाधात् स्वातन्त्र्यं मनश्चिदादीनाम्। कुतः? श्रुत्यादीनां बलीयस्त्वात्। सन्ति चाऽत्र तानि। श्रुतिस्ताव'द्विद्याचित'एवेति। लिङ्गं 'सर्वदा सर्वमायानि भूतानि'। वाक्यं तु 'विद्यया हैवैते'। एवंविधाश्चितो भवन्ति ॥ ३९ ॥

ननु त्वयापि प्रसिद्धेनाऽग्निना ऽतिदेशात्क्रियाऽनुप्रवेशिनस्ते इत्यत आह—

अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद् दृष्टश्च तदुक्तम् ॥ ५० ॥

अनुबध्यन्तएव तेषु मनश्चिदादिषु क्रियाऽवयवा आधानादयः 'मनसैवाऽधीयन्ते' इत्यादिनोक्ता येन सोऽय मनुबन्धः, आधानादिसंपादनमिति यावत्। आदिशब्देनाऽतिदेशादयः। न हि क्रियाऽनुप्रवेशिष्वग्निषु, इदं समञ्जसम्। तेभ्य एते स्वतन्त्राः। प्रज्ञान्तरपृथक्त्ववदिति निदर्शनम्। यथा प्रज्ञान्तराणां शाण्डिल्यादिविद्यानां परस्परं कर्मभ्यश्च पृथक्त्वं, तद्वत्। ननु प्रकरणादुत्कर्षो ऽदृष्टचरः कथमिव स्वीकरणीय? इत्यत आह-दृष्टश्च। अवेष्टेः राजसूयप्रकरणपठितायाः प्रकरणादुत्कर्षः। वर्णत्रयाऽनुबन्धात्तस्या राजसूयवत्त्वाच्च

राजसूयत्वम् । तदुक्तं प्रथमे काण्डे 'क्रत्वर्थैयमिति चेन्न वर्णसंयोगा'-दिति । 'आग्नेयो ऽष्टाकपालो हिरण्यं दक्षिणा' इत्याद्यवेष्टिः क्रतोः राजसूयस्य प्रकरणे पठिता, अतस्तदर्थैयमिति चेन्न । कुतः ? 'यदि वा ब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधायाऽऽहुतीनामाहुतीर्हुत्वा तमभिघारयेद्यदि वैश्यो वैश्वदेवं, यदि राजन्य ऐन्द्र'मिति वर्णैः सह संयोगः सम्बन्धः । न च राजसूयस्य 'राजा स्वाराज्यकामो राजसूयेन यजेते'ति श्रुतेः । तस्मात्तस्य राजसूयप्रकरणादुत्कर्षः॥५०॥

ननु मानसवत्क्रियाङ्गं भविष्यतीत्युक्तमित्यत आह—

न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ॥ ५१ ॥

न सामान्यादपि क्रियाङ्गत्वं मनश्चिदादीनाम् । कुतः ? केनाप्यंशेन कस्य चित्सामान्यस्योपलब्धेरित्यत आह—मृत्युवत् । 'स च एष मृत्यु'रित्यादित्यपुरुषस्या'ऽग्निर्वै मृत्यु'रित्यग्नेर्मृत्युत्वं च तयोरैक्यं तद्वत् । हि यस्मा'दसौ वै लोको ऽग्नि'रिति लोकस्याऽग्निभावाऽऽपत्तिस्तद्वत् । अत्यन्तवैलक्षण्ये लोकदृष्टान्तः ॥ ५१ ॥

ननु 'श्रद्धां जुह्वति' इति परेण लोकस्याऽग्नित्वं प्रतीयते, न चाऽन्यत्र तादृग्वाक्यमित्यत आह—

परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः ॥ ५२ ॥

परेण 'चाऽयं वाव लोक एषोऽग्नि श्चि'दित्यस्मिन्नुत्तरे ब्राह्मणे ताद्विध्यं केवलविद्याविधित्वं शब्दस्य प्रयोजनं लक्ष्यते न शुद्धं कर्माऽङ्गविधित्वम् । यत आह 'विद्यया तदारोहन्ती'त्यादि । तथा पुरस्तादपि 'यदेतन्मण्डल' मित्युपक्रम्याऽऽह 'सो ऽमृतो भवती'त्यादि । तत्सामान्यादिहापि तत्त्वम् । नन्वनुबन्धः कथं तर्हि?त्यत आह-भूयस्त्वात्त्वनुबन्धः । तुकारः कर्माङ्गतां व्यावर्तयति ॥ ५२ ॥

आधानादीनामप्यग्न्यवयवानां संपाद्यानां भूयस्त्वाद्बहुत्वादनुकरणे मनश्चिदादीना पुरुषार्थत्वमुक्तं, सम्प्रति पुरुषस्यैवाऽभावादित्याक्षिपति—

एकआत्मनः शरीरे भावात् ॥ ५३ ॥

एके लौकायतिका देहव्यतिरिक्तस्यात्मनोऽसत्त्वमाहुः। ज्ञानादीनामात्मधर्मत्वेनाऽभिमतानां शरीरे सति भावात् असति चाऽभावात् शरीरस्यैव ज्ञानादयो धर्माः ॥ ५३ ॥

सिद्धान्तमाह—

व्यतिरेकस्तद्भावाऽभावित्वान्न तूपलब्धिवत् ॥ ५४ ॥

देहाऽऽत्मनोर्व्यतिरेकः । कुतः ? तद्भावाऽभावित्वात् । तस्य देहस्य भावे ऽपि ज्ञानचेष्टादीनामभावित्वादसत्त्वात्। अतस्ते न देहधर्माः। तत्र निदर्शनमुपलब्धिवत्। यथा भूतभौतिकानामनुभवनमुपलब्धिर्विषयत्वेन न विषयधर्मो बलादापतति तद्वत् प्राणचेष्टादयोऽपि न देहधर्माः ॥ ५४ ॥

पूर्वाधिकरणे शरीरात्मनोर्भेदादात्मधर्माणामसम्भवः शरीरइत्युक्तम्, एवमेकशाखागतोद्गीथधर्माणां प्राणादिदृष्टीनां न हि शाखान्तरीयोद्गीथादिषु प्राप्तिरिति दृष्टान्तेनाक्षिप्य समाधत्ते—

अङ्गाऽवबद्धास्तु न शाखासु हि प्रतिवेदम्॥५५॥

'ओमित्येतदक्षरं लोकेषु पञ्चविध'मित्येवमाद्याः प्रतिवेदमुपासना न शाखास्वेव । उद्गीथादिश्रुत्यविशेषात्। तुशब्दो व्यवस्थानियमभेदार्थः ॥ ५५ ॥

नन्वन्यवेदपठितानां कथमन्यत्र परिग्रहः ? इत्यत आह—

मन्त्रादिवद्वा ऽविरोधः ॥ ५६ ॥

वाशब्दः शङ्कानिराकरणार्थः । यथा 'कुरूरसी'ति येषां मन्त्रो न पठितस्तेषामपि तेन मन्त्रेणाऽऽदानमेवमेवाऽग्नेरित्येवमादिमन्त्राणां यज्ञस्य दानम्। आदिशब्देन प्रयाजादीनां ग्रहणं तद्वत् शाखान्तरीयाणामप्युद्गीथादिधर्माणां ग्रहणे ऽविरोधः ॥ ५६ ॥

पूर्वाधिकरणे उद्गीथादिश्रुत्या सन्निधिं बाधित्वा उद्गीथाद्युपासनानां सर्वशाखासूपयोग उक्तः, एवमन्यत्र व्यस्तोपासनस्य विधिश्रुतेः

फलश्रुतेश्च समस्तोपासनस्य संनिधानात् प्राप्तं श्रुत्यर्थत्वं बाधित्वा विधेयमिति दृष्टान्तेनाक्षिप्य समाधत्ते—

भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति ॥ ५७ ॥

भूम्नः प्राचीनशालादिभिरुपास्यस्य समस्तवैश्वानरस्य ज्यायस्त्वं विवक्षितम् । क्रतुवदिति निदर्शनम् । यथा क्रतोर्दर्शपूर्णमासादेः साङ्गस्याऽनुष्ठेयत्वम् । तथा हि दर्शयति । हि यस्मात् यथोक्तमस्माभिस्तथा श्रुतिर्दर्शयति 'मूर्धा त्वेष' इत्यादि ॥ ५६ ॥

पूर्वाधिकरणे सत्यामपि सुतेजस्त्वादिगुणविशिष्टद्युलोकादिवैश्वानरोपासनानां फलभेदश्रुतावुपास्यैक्यमुक्तं तद्वदन्यासामपि ब्रह्मोपासनानामैक्यं स्यादिति दृष्टान्तेनाक्षिप्य समाधत्ते—

नाना शब्दादिभेदात् ॥ ५८ ॥

शाण्डिल्यदहरोपकोशलादिविद्या नाना भिन्ना एव । कुतः ? शब्दादिभेदात् । 'वेदोपासीते'त्यादिशब्दः । आदिशब्देन रूपाऽऽख्यादिभेदस्तस्मात् ॥ ५८ ॥

पूर्वाधिकरणे शब्दान्तरादिप्रमाणादुपास्तीनां भेद उक्त,स्तद्वदिहापि ;विकल्पसमुच्चयनियमयोः प्रमाणाऽभावात् याथाकाम्यमिति प्रत्युदाहरणेनाक्षिप्य समाधत्ते—

विकल्पोऽविशिष्टफलत्वात् ॥ ५१ ॥

साक्षात्कारफलहेतुभूतानां विद्यानां विकल्पः । कुतः ? अविशिष्टफलत्वात् । एकस्य साक्षात्कारफलस्य प्रत्येकं तासां दर्शितत्वात् एकस्मिन् कृते ऽन्यस्य वैयर्थ्यमिति भावः ॥ ५६ ॥

पूर्वाधिकरणे ऽहंग्रहोपासनानामुपास्यसाक्षात्कारपर्यन्तत्वात् विकल्पनियम इत्युक्तम् । तद्वत् प्रतीकोपासनानामपि तस्याऽऽर्थत्वाद् विकल्प इति दृष्टान्तेनाक्षिप्य समाधत्ते—

काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॥ ६० ॥

तुशब्दः काम्यानां विकल्पं व्यावर्तयति। काम्या विद्या यथाकामं काममनतिक्रम्य वर्तनमेव कामाऽनतिक्रममिह समुच्चीयेरन्न वेति तासां समुच्चयो विकल्पो वा इच्छया न पूर्वहेत्वभावात्। पूर्वहेतोः फलैक्यस्य कामस्याऽभावात्। अतः फलभूमार्थिसमुच्चयो नाऽन्यस्य ताश्च 'स य एतमेव वायु'मित्याद्याः॥ ६०॥

पूर्वाधिकरणे प्रतीकोपासनानां भिन्नफलत्वाद्यथाकामत्वमुक्तं, फलप्राप्त्यङ्गाश्रितोपासनेषु समुच्चयाऽनियमेन फलभेदस्याऽनैकान्तिकत्वादित्याद्धिपाति—

अङ्गेषु यथाश्रयभावः॥ ६१॥

कर्माऽङ्गेषु उद्गीथादिषु यथाश्रयभावः। यथैषामाश्रयाः स्तोत्रादयः संभूय भवन्ति एवं प्रत्यया अपि॥ ३१॥

शिष्टेश्च॥ ६२॥

यथा चाऽऽश्रयाः स्तोत्रादयः त्रिषु वेदेषु शिष्यन्ते एवमाश्रिता अपि प्रत्ययाः॥ ६२॥

समाहारात्॥ ६३॥

'होतुः सदनाद्धैवापि तु(?)रुद्गीथमनुसमाहरती'ति हौत्रात्कर्मण उद्गातुः स्वकर्मणस्तस्य समाहारः समाधानं तस्माल्लिङ्गात् समुच्चयः॥६३॥

गुणसाधारण्यश्रुतेश्च॥ ६४॥

विद्यागुणं च विद्याश्रयं सन्तमोङ्कारं वेदत्रयसाधारणं श्रावयति 'तेनेयं त्रयी'त्यादिना। अथ वा कर्मगुणानामुद्गीथादीनां सर्वप्रयोगसाधारण्यश्रुतेरपि तदाश्रितानां समुच्चयः॥ ६४॥

समाधत्ते—

न वा तत्सहभावाऽश्रुतेः॥ ६५॥

न वेति समुच्चयानियमव्यावर्तनम्। कुतः? तत्सहभावाऽश्रुतेः। तासामुपासनानां सहभावस्य समुच्चयस्याऽश्रुतेरश्रवणात्॥ ६५॥

नन्वसमुच्चयो ऽपि न श्रूयते इत्यत आह—

दर्शनाच्च ॥ ६६ ॥

दर्शयत्यपि श्रुतिरसहभाव'मेवं चिद्ध वै ब्रह्मे'त्यादिना ॥ ६६ ॥

इति श्रीब्रह्मसूत्रदीपिकायां तृतीया-
ऽध्यायस्य तृतीयः पादः ॥

—०**०—

एवं तावत्पूर्वपादे पराऽपरब्रह्मविद्यानां गुणोपसंहारनिरूपणेन परिमाणमवधारितम्, इदानीं तासां कर्मनिरपेक्षाणामेव पुरुषार्थसाधनत्वं निरूप्यते । तत्र ब्रह्मविद्यायाः केवलायाः पुरुषार्थत्वमाह—

पुरुषार्थोऽतः शब्दादिति बादरायणः ॥१॥

अतो वेदान्तविहितात् ज्ञानात् पुरुषार्थो भवतीति बादरायण आचार्यो मन्यते। कुतः? शब्दात्। 'तरति शोकमात्मवि'दिति श्रुतेः ॥१॥

शेषत्वात्पुषार्थवादो यथान्येष्विति जैमिनिः॥२॥

कर्तृत्वेनात्मनः कर्मशेषत्वात् तद्विज्ञाने कर्माणि वारयति विद्यास्तुतये । कर्माऽनुष्ठानमेतत् व्रीहिप्रोक्षणादिवद्विषयद्वारेण कर्मसम्बध एवेति एतस्मिन्नवगतप्रयोजने या फलश्रुतिः सा ऽर्थवाद इति जैमिनिराचार्यो मन्यते ॥ २ ॥

यथा ऽन्येषु द्रव्यसंस्कारकर्मसु 'यस्य पर्णमयी'त्यादिषु फलश्रुतिरर्थवादस्तद्वत् आत्मविज्ञानस्य कर्माङ्गत्वे न लिङ्ग मित्यत आह—

आचारदर्शनात् ॥ ३ ॥

आचारो जनकादीनां ब्रह्मविदां 'जनको हे'त्यादिना तस्य दर्शनात् ॥ ३ ॥

मन्वयमाचारः श्रुतेरभावे ऽप्रयोजक इत्यत आह—

तच्छ्रुतेः ॥ ४ ॥

तस्या विद्यायाः कर्माङ्गत्वं 'यदेव विद्यये'त्यादिश्रुतेः ॥ ४ ॥

कर्मफले विद्याजन्याऽतिशयाऽभावे न फलोपकार्यङ्गमित्यत आह—

समन्वारम्भणात् ॥ ५ ॥

'तं विद्याकर्मणी समन्वारभेते' इत्यस्मात् ॥ ५ ॥

तथापि कर्मसु प्रवृत्तस्य नाऽऽत्मज्ञानाऽवसर इत्यत आह—

तद्वतो विधानात् ॥ ६ ॥

तद्वतो ज्ञानवत 'एककुटुम्ब' इत्यादिना विधानात् ॥ ६ ॥

तथापि कर्मणां पाक्षिकत्वान्न नित्यवदेव ज्ञानाऽङ्गत्वमित्यत आह—

नियमाच्च ॥ ७ ॥

'कुर्वन्नेवे'त्यादि । चकारो नियमाऽभावे ऽपि ज्ञानस्याऽपुरुषार्थत्वमाह ॥ ७ ॥

सूत्रोक्तं राद्धान्तमाह—

अधिकोपदेशात्तु बादरयाणस्यैव तद्दर्शनात् ॥ ८ ॥

तुशब्दो जैमिनीयं मतं व्यावर्तयति । कुतः ? अधिकोपदेशात् । संसारिणो निरुपाधिकस्य परमात्मनः सर्वेषु वेदान्तेषूपदेशात् । यन्मतं बादरायणस्यैवं तत्तथैव स्थितं तद्दर्शनात् । 'यः सर्वज्ञ' इत्यादिभ्यः ॥ ८ ॥

ननूक्तमाचारादित्यत आह—

तुल्यं तु दर्शनात् ॥ ९ ॥

तुशब्दः पूर्वस्याऽऽचारस्य विद्यान्तरविषयत्वमाह ॥ ६ ॥

तुल्यं समाचारस्य दर्शनम् 'एतद्ध स्मे'त्यादिना 'यदेवे'त्यादिश्रुतेरुक्तमित्यत आह—

न सार्वत्रिकी ॥ १० ॥

न सर्वविद्याविषयेयं श्रुतिः, किन्तु प्रकृतोद्गीथविद्याविषयैव ॥१०॥

'तं विद्ये'त्यादिना फले समुच्चय उक्त इत्यत आह—

११०५३

विभागः शतवत् ॥ ११ ॥

विभागोऽयं न समुच्चयः। विद्यया ऽन्यस्याऽऽरम्भणं, कर्मणा ऽन्यस्य। शतवत्। यथा शतमाश्र्यां दीयतामित्यत्र विभागस्तद्वत् ॥१७॥

ननूक्तं तद्वतो विधानादित्यत आह—

अध्ययनमात्रवतः ॥ १२ ॥

न ज्ञानवतः ॥ १२ ॥

यदप्युक्तं नियमान्नेत्यत आह—

नाऽविशेषात् ॥ १३ ॥

त्वदुक्तं न। 'कुर्वन्नेवे'त्यत्र विदुष इति विशेषस्याऽश्रवणात्॥१३॥

प्रकरणसामर्थ्याद्विद्वानेव सम्बध्यतइत्यत आह—

स्तुतये ऽनुमतिर्वा ॥ १४ ॥

वाशब्दो विदुषः स्तुत्या तेषामवश्याऽनुष्ठेयत्वमाह ॥ १४ ॥

ननु कर्मश्रुतेर्विद्यास्तावकत्वमित्यत्रापि किं नियामकमित्यत आह—

कामकारेण चैके ॥ १५ ॥

अवगतपरमार्थाः प्रजां न कामयन्ते कामकारेणेति श्रुत्यर्थनिर्देशः। चकारो विद्वदनुभवं दर्शयति ॥ १५ ॥

ननु ब्राह्मणादिशरीरे कथं कर्माऽभाव ? इत्यत आह—

उपमर्दं च ॥ १६ ॥

क्रियाकारकादेरामनन्ति 'यत्र त्वस्ये'त्यादिना। चकारस्तादृक् प्रत्यक्षं समुच्चिनोति ॥ १६ ॥

तथापि कथं गृहस्थस्य कर्माऽभाव? इत्यत आह—

ऊर्ध्वरेतस्सु च शब्दे हि ॥ १७ ॥

ऊर्ध्वरेतस्सु आश्रमेषु विद्या श्रूयते न तत्र कर्माणि। चकारः

कर्मिणां विद्याऽनधिकारमाह। अत एव न सन्तीत्यत आह—शब्दे हि। हि यस्मात् 'त्रयो धर्मस्कन्धा' इत्येतस्मिन् शब्दे ऽवगम्यते॥१७॥

पूर्वाधिकरणे उर्ध्वरेतःस्वाश्रमेषु विद्यायाः कर्मनिरपेक्षता उक्ता, इदानीं तएवाऽऽश्रमा न सन्तीत्याक्षिपति। अथ वा पुरुषार्थाऽधिकरणे ज्ञानस्याऽसहायस्य मोक्षफलत्वमुक्तं, तन्न सम्भवति, गृहस्थादीनामपि ब्रह्मनिर्देष्टृत्वस्य संस्थानस्याऽभिधानात् तदनुष्ठितकर्मणा च ज्ञानसहकारित्वप्रतीतेरित्याक्षिप्यते—

परामर्शं जैमिनिरचोदना चाऽपवदति हि॥१८॥

जैमिनिराचार्य'स्त्रयो धर्मस्कन्धा' इत्यादिशब्दनिर्दिष्टफलानामाश्रमाणां परामर्शमात्रं मन्यते। कुतः? अचोदना। यतः विधायकशब्दाऽभाव इत्यर्थः। ननु विधिः कल्पनीय इत्यत आह-अपवदति हि। यस्माँ'दहरहर्वा' इत्यादिना अपवदति अतो न कल्प्यो विधिः। चकारो गृहस्थस्य प्रसिद्धिविरोधमाह॥ १८॥

परिहरति—

अनुष्ठेयं बादरायणः साम्यश्रुतेः॥ १९॥

अनुष्ठेयमाश्रमान्तरं बादरायण आचार्यो मन्यते, वेदे श्रवणात्। न चाऽन्धपङ्ग्वादिविषयत्वम्। तत्कुतः? साम्यश्रुतेः। गार्हस्थ्येन 'त्रयो धर्मस्कन्धा' इत्यादिना॥ १९॥

ननु तावतापि विधिर्न सिद्ध्येदित्यत आह—

विधिर्वा धारणवत्॥ २०॥

वाशब्दो विध्यभावं निराकरोति। विधिरेवाऽयमपूर्वार्थत्वात् धारणवत्। 'उपरि हि देवेभ्यो धारयती'त्यत्र तद्वत्। सति चाऽऽश्रमान्तरे ब्रह्मसंस्थत्वं न कर्मिणामित्यभिप्रायः॥ २०॥

एवं तावदनुष्ठेयमान्तरं गार्हस्थ्येन साम्यश्रुतेरित्युक्तं, तर्हि रसतमत्वादीनामङ्गाश्रितत्वेन 'स्वर्गं लोकमाहवनीय' इत्यादिस्तुतिसाम्यात् स्तुत्यर्थत्वमिति प्रत्युदाहरणेन सूत्राऽवयवेनाक्षिप्याऽवयवान्तरेण समाधत्ते—

स्तुतिमात्रमुपादानादिति चेन्नाऽपूर्वत्वात्॥२१॥

'स एष रसाना रसतम' इत्यादि स्तुतिमात्रं न विधिः । उद्गीथादिकर्माऽङ्गानां स्तावकत्वेनोपादानादिति चेत्तन्न । कुतः ? अपूर्वत्वात् । रसतमाद्यर्थस्य ॥ २१ ॥

ननु विधिकल्पनमेव दोष इत्यत आह—

भावशब्दाच्च ॥२२ ॥

भावशब्दो विधिशब्दः 'उपासीते'त्यादि । चकारो ऽपूर्वाधिगमे कल्पनं न दोष इत्याह ॥ २२

एवं तावत् उद्गीथादेः स्तुत्यर्थत्वात्सावकाशादुपास्यविषयसमर्पकत्वं रसतमत्वादेर्ज्याय इत्युक्तं, तर्ह्याख्यानानामपि विद्यास्तुत्यर्थत्वात्सावकाशात्पारिप्लवशेषत्वे ज्यायो ऽनुष्ठानपर्यवसानत्वं सम्भवतीति दृष्टान्तेन सूत्राऽवयेवनाक्षिप्य समाधत्ते—

पारिप्लवार्था इति चेन्न विशेषितत्वात्॥२३॥

'अथ ह याज्ञवल्क्यस्ये'त्याद्याख्यानश्रुतयः पारिप्लवार्था इति चेत् तन्न । कुतः ? 'पारिप्लमाचक्षीते;त्युपक्रम्य 'मनुर्वैवस्वत' इत्यादिना विशेषितत्वात् ॥ २३ ॥

ननूपलक्षणार्थं तद्विशेषणं स्यादित्यत आह—

तथा चैकवाक्यतोपबन्धात् ॥ २४ ॥

चकार उपलक्षणार्थत्वं वारयति । तथा आख्यानानां पारिप्लवार्थत्वे सति सन्निहितविद्योपयोगो न्याय्यस्तद्वतोपाख्यानानाम् । कुतः ? एकवाक्येनोपबन्धनात्, तत्र तत्राऽऽख्यानानां विद्याभिः सम्बन्धस्योपलम्भात् ॥ २४ ॥

पूर्वाधिकरणे आख्यानानां विद्यासन्निधेर्विद्याशेषत्वमुक्तं, तर्हि विद्याप्रकरणे 'यज्ञेने'त्यादिवाक्येन यज्ञादीनां विद्यायां विनियोगात् तेषां विद्याशेषत्वमिति दृष्टान्तेनाक्षिप्य समाधत्ते—

अत एव चाऽग्नीन्धनाद्यनपेक्षा ॥ २५ ॥

चकारः कारणान्तरं व्यावर्तयति । यतो ज्ञानात्पुरुषार्थः अत एव विद्यायाः स्वफले ऽग्नीन्धनादिकर्मणामनपेक्षा ॥ २५ ॥

पूर्वाधिकरणे विद्याफले कर्माऽनपेक्षा उक्ता, यथा फले तद्वदुत्पत्तावपि इति दृष्टान्तेनाक्षिप्य समाधत्ते—

सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥ २६ ॥

चकाराद्विद्याया उत्पत्तावनपेक्षत्वं वारयति। सर्वापेक्षा सर्वस्याऽऽश्रमादिकर्मजातस्य विद्याया उत्पत्तावपेक्षा। कुतः? यज्ञादिश्रुतेः। 'विविदिषन्ती'त्यादिना इच्छायाः। अश्ववदिति योग्यतायां निदर्शनम्। अश्वो रथस्य वहने ऽपेक्षितो न लाङ्गलस्यैवं विद्याया उत्पत्तौ कर्मापेक्षा न ज्ञानफले ॥ २६ ॥

तर्हि कर्माण्येव सन्तु, न ज्ञानोत्पत्तावन्यदनुष्ठेयमित्यत आह—

शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदङ्गतया तेषामवश्याऽनुष्ठेयत्वात् ॥ २७ ॥

तुशब्दः शङ्कानिराकरणार्थः। कुतः? तद्विधेः। तेषां शमादीनाम् इत्याद्युपक्रम्य 'पश्ये'दिति विधेः। स विधिः स्वतन्त्र इत्यत आह—तदङ्गतया। तस्या विद्याया अङ्गत्वेन विधिर्यस्ततो विद्यार्थिनां तेषामवश्याऽनुष्ठेयत्वादन्तरङ्गसाधनत्वं तेषाम् ॥ २७ ॥

पूर्वाधिकरणे विविदिषन्तीति पञ्चमलकाराऽश्रयणेन विधिरुक्तः, एवं चा'ऽन्नं भवती'ति विधिरिति दृष्टान्तेनाक्षिप्य समाधत्ते—

सर्वान्नाऽनुमतिश्च प्राणात्यये तद्दर्शनात् ॥ २८ ॥

'न ह वा एवंविदी'त्यादिना सर्वाऽन्नानुमतिरनुज्ञाता, सापि प्राणात्यये परस्यामापदि। कुतः? तद्दर्शनात्। तस्य प्राणाऽत्यये सर्वान्नभक्षणस्य 'मटचीहतेष्वि'त्यादिना दर्शनात् ॥ ३८ ॥

ननु श्रुतस्य कस्मात्सङ्कोचः क्रियते? इत्यत आह—

अबाधाच्च ॥ २९ ॥

'आहारशुद्धौ सत्त्वशुद्धि'रित्यादेः शास्त्रस्य। चशब्दाच्छिष्टाऽऽचारस्य च ॥ २६ ॥

ननु शास्त्रद्वयं विद्वदविद्वद्विषयं भवत्वित्यत आह—

अपि च स्मर्यते ॥ ३० ॥

'जीवितात्ययमापन्नो यो ऽन्नमत्ति यतस्ततः' इत्यादिना साधारण्यमपिशब्दो दृश्यते ऽपीत्याह ॥ ३० ॥

ननु निषेधाऽभावे नेदं बुद्धिसामर्थ्यात्कल्पयितुं शक्यमित्यत आह—

शब्दश्चातो ऽकामकारे ॥ ३१ ॥

अकामकारः कामकारनिवृत्तिप्रयोजनः कठानां 'तस्माद् ब्राह्मणः सुरां न पिबेदि'ति सर्वान्ननिषेधकशब्दः । अतो ऽस्माद्विधेरभावात्सो ऽप्युपपन्नः । चकारो लौकिकं प्रतिषेधमाह ॥ ३१ ॥

पूर्वाधिकरणे यथा शास्त्रान्तराविरोधात् सर्वत्र वचनं विद्यायाः स्तावकमुक्तं तद्वद्विविदिषावचनमपि विद्यायाः स्तावकमिति । अन्यथा कर्मणामनेकत्वाऽभावात् मुमुक्षोरेवाऽनुष्ठेयत्वमिति दृष्टान्तेनाक्षिप्य समाधत्ते—

विहितत्वाच्चाऽऽश्रमकर्मापि ॥ ३२ ॥

चकारस्त्वर्थे । स हि मुमुक्षोरेव नाऽनुष्ठेयत्वं कर्मणां वारयति, किं त्वनुष्ठेयं मुमुक्षूणामप्याश्रमकर्माऽग्निहोत्रादिकम् । कुतः ? विहितत्वात् । 'यावज्जीवमग्निहोत्र'मित्यादिना । एवं चेद्विद्यासाधनानि न स्युरित्यत आह—

सहकारित्वेन च ॥ ३३ ॥

सहकारित्वं साधनत्वं 'यज्ञेने'त्यादिना विद्यासाधनत्वेनापि विहितत्वादित्यर्थः ॥ ३३ ॥

ननु तर्हि दर्शपौर्णमासादीनां विद्यासहकारित्वपक्षे कर्मभेदो ऽत आह—

सर्वथापि तएवोभयलिङ्गात् ॥ ३४ ॥

ते एवाऽग्निहोत्रादयो धर्मा अनुष्ठेयाः । कुतः ? उभयलिङ्गात् । श्रुतिस्मृतिलिङ्गात् । 'विविदिषन्ती'त्यादिश्रुतिः । 'अनाश्रितः कर्मफल'मित्यादिका स्मृतिः । अत एव हि प्रसिद्धवदुत्पन्नानां कर्मणां विनियोगं कुर्वन्ति । अथ वा वेदकत्वं लिङ्गं तस्मात् ॥ ३४ ॥

ननु साधनसम्पन्नस्य यदि विद्यायां कश्चानाऽतिशयः श्रुतो वा स्यात् तदा यज्ञादीनां सहकारित्वं कल्प्यमानमुचितं स्यादित्यत आह—

अनभिभवं च दर्शयति ॥ ३५ ॥

'एष ह्यात्मा न नश्यति यं ब्रह्मचर्येणे'त्यादिना । अत्र प्रत्यक्षमप्याह ॥ ३५ ॥

पूर्वाधिकरणे नित्यानां यज्ञादीनां विद्यायाः पृथग्विनियोगात् न नित्याऽनित्यसंयोगविरोध इत्युक्तं, मा भूत् गृहस्थाऽऽश्रमकर्मणि विरोधः, विधुरादिके तु स्यादित्याक्षिप्य समाधत्ते—

अन्तराचापि तु तद्दृष्टेः ॥ ३६ ॥

अन्तरा विधुरादीनामन्तरालवर्तिनां विद्यायामधिकारः । कुतः ? तद्दृष्टेस्तस्याऽधिकारस्य रैक्वादिषु दृष्टेः । तुकारस्त्वन्तरालवर्तिनामनधिकारं व्यावर्तयति । चकारो ऽन्येषामप्यधिकारं समुच्चिनोति॥३६॥

नन्विदं दर्शनमस्मार्तमित्यत आह—

अपि च स्मर्यते ॥ ३७ ॥

संवर्तप्रभृतीनामन्तरालवर्तिनां महायोगित्वं पुराणादौ ॥ ३७ ॥

ननु कर्महीनानामशुद्धाऽन्तःकरणानां कथं विद्यायामाधिकारः ? इत्यत आह—

विशेषाऽनुग्रहश्च ॥ ३८ ॥

तेषामपि जपोपवासादि कर्मविशेषैरनुग्रहः । चकाराज्जन्मान्तरकृतैरपि ॥ ३८ ॥

एवं चेदाश्रमकर्मणामनुष्ठानं व्यर्थमित्यत आह—

अतस्त्वितरज्ज्यायो लिङ्गाच्च ॥ ३९ ॥

तुशब्द आश्रमकर्मणामनुष्ठानस्याऽवैयर्थ्यमाह । अतो ऽन्तरालवर्तित्वादितरदाश्रमवर्तित्वं ज्यायः श्रेष्ठं विद्यासाधनम् । कुतः ? श्रुतिस्मृतिलिङ्गाच्च । श्रुतिर्लिङ्ग'मनाश्रमी न तिष्ठे'दित्यादि । तस्मात् । चकारस्ताभ्यां विहितत्वमप्याह ॥ ३९ ॥

पूर्वाधिकरणे ऽनाश्रमकर्मिणामपि विद्यासाधनत्वमुक्तम्, एवं चेदाश्रमभ्रष्टानामपि तद्वदेवाऽनाश्रमिकत्वेन विद्यासाधनत्वमिति दृष्टान्तेनाक्षिप्य समाधत्ते—

तद्भूतस्य तु नाऽतद्भावो जैमिनेरपि नियमाऽतद्रूपाऽभावेभ्यः ॥ ४० ॥

तुशब्द उत्तमाऽऽश्रमाऽधिरूढस्याऽऽमरणं तस्मिन्नेवाऽवस्थानमाह। तद्भूतस्य संन्यासाश्रमाऽऽश्रमिणोऽतद्भावः अतदाश्रमाऽवस्थितिस्तत्परित्यागमात्रं वा नेति जैमिनेराचार्यस्य मतं, किमु बादरायणस्य। कुतः? नियमाऽतद्रूपाऽभावेभ्यः। नियम'स्ततो न पुनरिया'दिति। अतद्रूपं यथा ब्रह्मचर्यादाश्रयत्रयगमनं तद्रूप्यते शब्देनैव संन्यासादिभ्य आश्रमान्तरम्। अभावश्च शिष्टाचारस्य संन्यासादीनां गार्हस्थ्यस्वीकारस्तेभ्यः ॥ ४० ॥

पूर्वाधिकरणे शास्त्राऽभावान्न तत्प्रत्यवरोहित्वमित्युक्तं, तद्वदेव शास्त्राऽभावान्न तेषां प्रायश्चित्तमपीत्याक्षिपति—

न चाऽऽधिकारिकमपि पतनाऽनुमानात् तदयोगात् ॥ ४१ ॥

अधिकारलक्षणे षष्ठाऽध्याये उक्तमाधिकारिकम्, अब्रह्मचारी पशुश्च तद्वदाधानस्याऽप्राप्तकालत्वादिति अवकीर्णी 'अथ यो ब्रह्मचारी स्त्रियमुपेयात्स गर्दभं पशुमालभेते'ति ब्रह्मचारिणः स्त्रीगमने गर्दभः पशुः। सोऽपि तद्वदुपनयनहोमवत्। यथोपनयनहोमो लौकिकाग्नौ तद्वत् अयमपि पशुर्लौकिक एव। कुतः? आधानस्य दारसंग्रहपुरःसरस्य ब्रह्मचारिणोऽप्राप्तत्वादिति यदुक्तं तदपि न नैष्ठिकब्रह्मचारिण एवं प्रायश्चित्तम्। कुतः? 'आरूढो नैष्ठिकं धर्म'मित्यादिना अप्रतिसन्धेयस्य पतनस्याऽनुमानात् स्मरणात् छिन्नशिरस इव प्रतिक्रियाऽभावान्नैष्ठिकस्य प्रायश्चित्ताऽयोगादिति पूर्वपक्षः ॥ ४१ ॥

राद्धान्तमाह—

उपपूर्वमपि त्वेके भावमशनवत्तदुक्तम् ॥४२॥

तुशब्दः प्रायश्चित्ताऽभावं व्यावर्तयति। एके आचार्या गुरुदारादिभ्योऽन्यत्र ब्रह्मचर्यच्यवनमुपपूर्वमपि उपपातकमप्याहुः, कि-

मुत प्रायश्चित्तस्य सत्त्वम् । अतः प्रायश्चित्तस्य भावं मन्यामहे । अशनवत् । यथा मधुमांसादिभक्षणे उपकुर्वाणस्य पुनःसंस्कारः प्रायश्चित्तं तद्वत् । तदुक्तं प्रमाणलक्षणे 'समा विप्रतिपत्तिः स्यात्' यववराहादिकारणपूर्वपक्षे आर्यम्लेच्छयोर्यववराहादिषु 'समा विप्रतिपत्तिः स्यात्' इति सूत्रं सिद्धान्तितम्। तेन यववराहादिशब्दानामार्यप्रसिद्धानामेव स्वीकार इत्येतदर्थं सूत्रं 'शास्त्रस्था वा तन्निमित्तत्वा'दिति। वाशब्दो म्लेच्छप्रसिद्धिं व्यावर्तयति । शास्त्रस्थैवार्यप्रसिद्धिः स्वीकरणीया । कुतः ? तस्य शास्त्रस्य यत्रा'ऽन्या ओषधयो म्लायन्ते' इत्यादेर्निमित्तत्वात् नियामकत्वात्। अथ वा तस्याऽर्थस्य प्रसिद्धेः शब्दार्थसंगतिग्रहणे निमित्तत्वात् ॥ ४२ ॥

पूर्वाधिकरणे आरूढपतितानामपि प्रायश्चित्तमस्तीत्युक्तं, प्रायश्चित्तवद्व्यवहारोपि तेषां स्यादिति दृष्टान्तेनाक्षिप्य समाधत्ते—

बहिस्तूभयथा ऽपि स्मृतेराचाराच्च ॥ ४३ ॥

तुशब्दः कृतप्रायश्चित्ते व्यवहाराऽभाव माह । यद्यवकीर्णित्वमुपपातकं यदि वा महापातकम् उभयथापि शिष्टैस्ते कृतप्रायश्चित्ता अपि बहिष्कार्याः ।कुतः? स्मृतेराचाराच्च । स्मृति'रारूढपतित'मित्याद्या । आचारः शिष्टानाम् । चकारात्प्रायश्चित्ताभिधानादपि ॥४३॥

पूर्वाधिकरणे वचनादव्यवहार्यत्वमुक्तं तद्व'द्वर्षति हे'ति वचनादङ्गावबद्धमुपासनं स्वामिन इति दृष्टान्तेनाक्षिप्य समाधत्ते—

स्वामिनः फलश्रुतेरित्यात्रेयः ॥ ४४ ॥

अङ्गावबद्धान्युपासनानीति स्वामिनो यजमानस्य कर्माणीत्यात्रेय आचार्यो मन्यते । हेतुमाह–फलश्रुतेरिति । 'वर्षति हास्मै'त्यादेरिति पूर्वपक्षः ॥ ४४ ॥

राद्धान्तस्तु—

आर्त्विज्यमित्यौडुलौमिस्तस्मै हि परिक्रीयते ॥४५॥

आर्त्विज्यमित्यौडुलोमिराचार्यो मन्यते । हि यस्मात् तस्मै साङ्गकर्मसिद्ध्यर्थं यजमानेनर्त्विक् परिक्रीयते ॥ ४५ ॥

पूर्वाधिकरणे 'बको दाल्भ्य' इति वाक्यशेषादङ्गोपासनमृत्विक्कर्मेत्युक्तम्, एवमिहापि विधिरहितवाक्यशेषा'दथ मुनि'रिति दृष्टान्तेनाक्षिप्य समाधत्ते—

सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥ ४६ ॥

सहकार्यन्तरस्य मौनस्य बाल्यपाण्डित्यवद्विधिरेवाश्रयणीयः। यदत्रोक्तं तन्मौनमित्यत आह-तृतीयं बाल्यं पाण्डित्यं चोक्तम्। कस्यैतदित्यत आह-तद्वत 'आत्मानं विदित्वे'त्यादिनोक्तो यः संन्यासी तद्वान् विद्यावान् तस्य चेद्यर्थं विधानमित्यत आह-पक्षेणेति। भेददर्शनस्य प्राबल्यं तस्मिन्पक्षे इत्यर्थः। सहकारिविधाने निदर्शनं विध्यादिवत्। यथा पौर्णमासादावाधानादिकं तद्वत् ॥४६॥

विद्यावांश्चेत् संन्यस्यति तर्हि कस्मात् छान्दोग्ये 'कुटुम्ब' इत्यादिना गृहस्थेनोपसंहार इत्यत आह—

कृत्स्नभावात्तु गृहिणोपसंहारः ॥ ४७ ॥

तुशब्दो विशेषणार्थः। कृत्स्नभावोऽस्य विशेष्यते बहुलाऽऽयासानि हि बहून्याश्रमकर्माणि यज्ञादीनि तं प्रति कर्तव्यतयोपदिष्टानि। आश्रमान्तरकर्माणि च यथासम्भवमहिंसेन्द्रियसंयमादीनि तस्यापि विद्यन्ते। तस्मात् गृहमेधिनोपसंहारो न विरुध्यते ॥ ४७ ॥

ननु यथा ब्रह्मचारिवानप्रस्थयोरश्रौतत्वं तद्दृष्टान्तेनेतरस्याप्यस्त्वश्रौतत्वमित्यत आह—

मौनवदितरेषामप्युपदेशात् ॥ ४८ ॥

इतरेषां ब्रह्मचारिवानप्रस्थाश्रमवृत्तीनामप्युपदेशात् 'त्रयो धर्मस्कन्धा' इत्यादिना। किंवत्? मौनवत्। संन्यासिमात्रोपलक्षणमेतत् गृहस्थस्यापि संन्यासिवत् गृहस्थवत् ब्रह्मचारिवानप्रस्थयोरपि श्रौतत्वमेव स्यादित्यर्थः ॥ ४८ ॥

पूर्वाधिकरणे मौनशब्दस्य ज्ञानाऽतिशये प्रसिद्धत्वात् मौनविधिराश्रितः, एवं बालशब्दस्यापि कामचारादिकारिणि प्रसिद्धत्वात् अत्रापि स एवार्थ इति दृष्टान्तेनाक्षिप्य समाधत्ते—

अनाविष्कुर्वन्नन्वयात् ॥ ४९ ॥

'बाल्येन तिष्ठासे'दित्यत्र बाल्येनाऽवस्थानं नाम एतत् यद्रागद्वेषादि अनाविष्कुर्वन् न तु कामचारादि । कुतः ? रागादिराहित्ये विद्योपकारस्याऽन्वयात् ॥ ४९ ॥

पूर्वाधिकरणे विद्योपयोगान्न रागादिकं बालशब्दार्थः सम्भवादित्युक्तम् अत्रापि युक्तं, विद्यानां फलस्येह लोके एव सम्भवात् ऐहिकफला विद्येति दृष्टान्तेनाक्षिप्य समाधत्ते—

ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥ ५० ॥

कर्मान्तरेणाऽसति प्रतिबन्धे ऐहिकमस्मिन्नेव जन्मनि विद्याफलं कर्मान्तरेण सति प्रतिबन्धे जन्मान्तरेऽपि विद्या जायते । कुतः ? गर्भस्थ एव वामदेवः प्रतिबुबुधे ब्रह्माऽहमभवमिति वदन्तो जन्मान्तरे संचितात्तु साधनाज्जन्मान्तरे विद्योत्पत्तिं दर्शयन्ति ॥ ५० ॥

पूर्वाधिकरणे विद्याया ऐकरूप्येपि यज्ञादीनां साधनानामनेकरूपता इह वा स्यादित्युक्तं, तर्हि अनियतसाधनत्वान्मोक्षोप्यनियत एव स्यात् कर्मफलवदिति दृष्टान्तेनाक्षिप्य समाधत्ते—

एवं मुक्तिफलाऽनियमस्तदवस्थाऽवधृतेस्तदवस्थाऽवधृतेः ॥ ५१ ॥

यथा विद्यासाधनानां विद्याफले विशेष इह परत्र चेति नैवं मुक्तिलक्षणे फले । कुतः ? तदवस्थाऽवधृतेः । मोक्षाऽवस्थायां ब्रह्मरूपाया एकरूपत्वेना 'ऽस्थूलमन'ण्वित्यादिना ऽवधृतेरवधारणात् । पदाभ्यासो ऽध्यायपरिसमाप्त्यर्थः ॥ ५१ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्याऽऽनन्दात्मपूज्यपादशिष्यस्य श्रीशङ्करानन्दभगवतः कृतौ ब्रह्मसूत्रदीपिकायां तृतीयाऽध्यायस्य चतुर्थः पादः ॥

संपूर्णश्च तृतीयो ऽध्यायः ।

———:o:———

तृतीये ऽध्याये साधनचिन्ता वृत्ता। चतुर्थे फलचिन्ता प्रवर्तते। तत्रापि प्रथमेन पादेन जीवन्मुक्तिः प्रतिपाद्यते। तत्राप्यात्मेत्याद्यधिकरणचतुष्टयं प्रासङ्गिकम्, अन्यत्तु साधनाध्यायशेषमपि प्रमाणफलत्वेनाऽत्र फलाध्याये सङ्गतं, तत्राहंग्रहोपासनानां श्रवणादीनां चाऽर्थसिद्धा ऽऽवृत्तिरित्याह—

आवृत्तिरसकृदुपदेशात् ॥ १ ॥

प्रत्ययानामावृत्तिः करणीया। कुतः? 'श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इत्यादिना ऽसकृदुपदेशात् ॥ १ ॥

ननु श्रवणादीनां प्रत्येकं सकृत् श्रवणे प्रत्ययावृत्तिः कथं सिद्ध्यती?त्यत आह—

लिङ्गाच्च ॥ २ ॥

'रश्मींस्त्वं पर्यावर्तयता'दित्यादेः। चकाराद्दर्शनसामर्थ्यादपि॥२॥

पूर्वाधिकरणे आत्मज्ञानाऽऽवृत्तिः करणीयेत्युक्तं, तत्र जीवो नित्यप्रत्यक्षः, नित्याऽपरोक्ष एवाऽऽत्मा कस्य ज्ञानस्यार्थनियमावृत्ति?रित्याक्षिप्य समाधत्ते—

आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥ ३ ॥

तुशब्दो ऽन्यत्र त्वंग्रहं व्यावर्तयति। 'यो ऽयं परमात्मेति त्वं वा अहमस्मी'त्यादिना च उपगच्छन्ति गृह्णन्ति च ग्राहयन्त्यपि च। 'एष तआत्मे'त्यादिना ॥ ३ ॥

पूर्वाधिकरणे जीवपरमात्मनोरभेदग्रह उक्तः 'एष तआत्मे'त्यादिश्रुत्या, तद्वदात्मनो ब्रह्मेत्यादावपि प्रतीकेष्वभेदग्रह इति दृष्टान्तेनाक्षिप्य समाधत्ते—

न प्रतीकेन हि सः ॥ ४ ॥

प्रतीकोपासने 'मनो ब्रह्मे'त्यादौ नात्मेति ग्रहीतव्यम्। हि यस्मात् स उपासको नात्मत्वेन प्रतीकानि ग्रहीतुं शक्तः ॥ ४ ॥

पूर्वाधिकरणे 'मनो ब्रह्मे'त्यादौ नैका दृष्टिरित्युक्तम्। एवं चेन्नियामकाऽभावात् ब्रह्मणि मनआदिदृष्टिः करणीयेति बुद्धिसान्निध्यादाक्षिप्य समाधत्ते—

ब्रह्मदृष्टिरुत्कर्षात् ॥ ५ ॥

मनआदौ ब्रह्मदृष्टिः कार्या ब्रह्मण उत्कर्षात्। उत्कृष्टदृष्टौ निकृष्टे कृतायां निकृष्टस्योत्कृष्टता भवति ॥ ५ ॥

आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥ ६ ॥

उद्गीथाद्यङ्गेष्वादित्यादिमतयः कर्त्तव्याः। कुतः? उपपत्तेः। एवं ह्युद्गीथादीनामादित्यादिमतिसंस्कारे कर्मण्यतिशयः स्यात्। चकारो नादित्यादिषु उद्गीथादिमतय इत्याह। एतच्चतुष्टयं प्रासङ्गिकम् ॥ ६ ॥

पूर्वाधिकरणे आदित्यादिमतय उद्गीथादिसंस्कारत्वेन करणीया इत्युक्तं, तासु यथा कामपरतन्त्रत्वात् नाऽऽसननियम एवमन्यास्वपि विद्यासु अविशेषादिति बुद्धिस्थत्वेन दृष्टान्तेनाक्षिप्य समाधत्ते—

आसीनः सम्भवात् ॥ ७ ॥

प्रतीकाद्युपासनेष्वासीन एवोपासनां कुर्यात्। कुतः? सम्भवात्। प्रत्ययावृत्तेरुपविष्टस्य ॥ ७ ॥

ननूपासनस्य निर्गुणब्रह्मज्ञानवदनियतिरासनस्य कुतो न स्यादित्यत आह—

ध्यानाच्च ॥ ८ ॥

ध्यायत्यर्थ एष यत्समानप्रत्ययप्रवाहकरणं, ध्यायतिश्च प्रशिथिलाङ्गचेष्टेषु प्रतिष्ठितदृष्टिष्वेकविषयाक्षिप्तचित्तेषु बकादिषु दृष्टा। चकार आसीनस्य नियममाह ॥ ८ ॥

ननु गच्छतामपि ध्यायत्यर्थः सम्भवी इत्यत आह—

अचलत्वञ्चापेक्ष्य ॥ ९ ॥

'ध्यायतीव' पृथिवीत्याद्युक्तं, चकारो गमनध्यानयोरितरेतरव्याहतिरित्याह ॥ ९ ॥

ननु किमिदं यौक्तिकमेवेत्याशङ्क्य नेत्याह—

स्मरन्ति च ॥ १० ॥

'शुचौ देशे' इत्यादिना चकारात्पठन्त्यपि 'त्रिरुन्नत'-मित्यादिना ॥ १० ॥

पूर्वाधिकरणे आसीनेन समानप्रत्ययप्रवाहः करणीयः, सम्भवादित्युक्तं, अत्रापि वैदिकत्वेन दिग्देशादिनियमः सम्भावित इति दृष्टान्तेनाक्षिप्य समाधत्ते—

यत्रैकाग्रता तत्राऽविशेषात् ॥ ११ ॥

दिग्देशकालेषु न नियमः। यत्र यस्यां दिशि यस्मिन्काले वा मनःस्वास्थ्यं तत्रैवोपासनम्। कुतः ? अविशेषात् । विशेषाऽनुपालम्भात् ॥ ११ ॥

पूर्वाधिकरणे दिग्देशाद्यनियम उक्तश्चित्तप्रसादाऽविशेषेण हेतुना, तथा काम्यानामपि यावदिच्छं चिन्तनीयमिति दृष्टान्तेनाक्षिप्य समाधत्ते—

आ प्रायणात्तत्रापि हि दृष्टम् ॥ १२ ॥

अभ्युदयफलानां प्रत्ययानामा प्रायणात् आ मरणाद्वृत्तिः। हि यस्मात् तत्रापि मरणेऽपि 'यच्चित्त' इत्यादिश्रुतिभ्यः 'यं यं वापी'-त्यादिस्मृतिभ्यश्च प्रत्ययावर्तनं दृष्टम् । अपिशब्दात्पूर्वमपि सातत्ये 'सदा तद्भावभावित' इत्यादिस्मृतिभ्यः ॥ १२ ॥

पूर्वाधिकरणे 'सदा तद्भावभावित' इत्यादिस्मृत्या आ प्रायणादभ्युदयप्रत्ययानामावृत्तिरुक्ता, तद्वदत्रापि 'प्रकृतिस्त्वां नियोक्ष्यति' 'नाऽभुक्तं क्षीयते कर्मे'त्यादिस्मृतिभ्यो विदुषो ब्रह्मज्ञानान्नोत्तराऽघाश्लेषः, न च पूर्वस्य विनाश इति दृष्टान्तेनाक्षिप्य समाधत्ते—

तदधिगम उत्तरपूर्वाऽघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥ १३ ॥

तस्य ब्रह्मणोऽधिगमे उत्तराऽघस्याऽश्लेषः पूर्वाऽघस्य विनाशः। कुतः ? तद्व्यपदेशात् । तयोरश्लेषविनाशयोर्व्यपदेशः अश्लेषस्य 'तद्यथा पुष्करपलाशे' इत्यादिना विनाशस्य 'तद्यथेषीकातूल' इत्यादि, तस्मात ॥ १३ ॥

पूर्वाधिकरणेऽघाऽश्लेषविनाशावुक्तौ भवेतां, मास्तु सुकृतस्याऽभुक्तस्येत्याक्षिप्य समाधत्ते—

इतरस्याप्येवमसंश्लेषः पाते तु ॥ १४ ॥

इतरस्य सुकृतस्यापि यथा दुष्कृतस्यैवमघाऽसंश्लेषः। एतदुपलक्षणं विनाशस्यापि 'उभे उ हैवैष तरती'त्यादिश्रुतेः। तुशब्दोऽवधारणार्थः। पाते शरीरस्य पतने यत इदं सिद्धं शरीरस्य पाते विदुषो मुक्तिर्भवत्येत्र ॥ १४ ॥

पूर्वाधिकरणे सुकृतस्यापि क्षय उक्तः, तथा च सद्यः शरीरपातः स्यादित्याक्षिप्य समाधत्ते—

अनारब्धकार्ये एव तु पूर्वे तदवधेः ॥ १५ ॥

तुशब्द आरब्धकार्ययोः क्षयं व्यावर्तयति। द्वे पूर्वसुकृतदुष्कृते ते अनारब्धकार्ये। तयोरपि इतरयोरिव क्षयं व्यायर्तयति एवकारः। कुतो ऽयं नियम? इत्याह—तदवधेः। तस्य शरीरपातस्याऽवधेः कारणात् 'तस्य तावदेव चिर'मित्यादिवाक्येन ॥ १५ ॥

पूर्वाधिकरणत्रयेण सगुणविद्यायां निर्गुणविद्यायां चाऽनारब्धकार्ययोः सुकृतदुष्कृतयोः क्षय उक्तः, तत्र यथा निर्गुणविद्यायामुत्पन्नायामग्निहोत्राद्यनुपयोगः एवं सगुणायामपीति दृष्टान्तेनाक्षिप्य समाधत्ते। अथ वा पूर्वाधिकरणे काम्यस्य सुकृतस्य क्षय उक्तः, काम्यवन्नित्यस्यापि विद्यया क्षयसम्भवात् न विद्याया हेतुत्वमित्याक्षिप्य समाधत्ते—

अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॥ १६ ॥

तुशब्दो नित्यस्याऽग्निहोत्रादेः कर्मणः क्षयं व्यावर्तयति। नित्यमग्निहोत्रादि तत्तस्या विद्यायाः कार्यायैव मोक्षायैव परम्परया ऽऽहुतेस्तद्दर्शनात् तस्याऽग्निहोत्रादेर्विद्याकार्यत्वस्य 'तमेत'मित्यादेर्दर्शनात्। किंविषयं पुनरिदमश्लेषविनाशवचनं किंविषयं वा ऽऽदौ विनियोगवचनम् एकेषां शाखिनां 'तस्यपुत्रा दायमुपयन्ती'त्यादि? अत उत्तरं पठति—

अतोन्या ऽपि ह्येकेषामुभयोः ॥ १७ ॥

अतो ऽग्निहोत्रादेर्नित्यात्कर्मणो ऽन्यापि ह्यस्ति साधुकृत्या फलमभिसंधाय क्रियते तस्या विनियोग एवमुक्तः। एकेषां शाखिनां 'सु-

दः साधुकृत्या' मिति, तस्या एवेदं संश्लेषविनाशनिरूपणमितरस्याप्येवमित्यादिना। तथैकजातीयस्य काम्यस्य कर्मणो विद्यां प्रत्यनुपकारकत्वे संमतिरुभयोरपि जैमिनिबादरायणयोराचार्ययोः॥१८॥

पूर्वाधिकरणे विद्याऽङ्गत्वेन कर्माऽनुष्ठेयमित्युक्तं, तद्वदङ्गाऽवबद्धेष्वप्युपासनेषु नित्यकर्माऽनुष्ठानं तत्सहितमेवेति दृष्टान्तेनाक्षिप्य समाधत्ते—

यदेव विद्ययेति हि ॥ १७ ॥

विद्यासहितं तद्रहितं च कर्म विद्याङ्गम् । हि यस्मात् 'यदेव विद्यये'ति वाक्यान्तरात् कर्मणो विद्यायोगे ऽति शयमाह, न तु कर्मणो ऽफलत्वे वचनमिदं सार्थकम् ॥ १८ ॥

पूर्वाधिकरणे ऽङ्गावबद्धोपासनासहितस्य कर्मणः फलाधिक्यं तस्य केवलस्य ब्रह्मविद्यासाधनत्वं सामर्थ्यादित्युक्तम्, एवमत्रापि सामर्थ्यादारब्धकार्ययोरपि प्रकारान्तरेण क्षयाऽभावात् ब्रह्मज्ञानादेवोपक्षय इति दृष्टान्तेनाक्षिप्य समाधत्ते—

भोगेन त्वितरे क्षपयित्वा संपद्यते ॥ १९ ॥

भोगेन भोगेनैव इतरे सुकृतदुष्कृते आरब्धकार्ये क्षपयित्वा ऽनन्तरं सम्पद्यते ब्रह्म 'तस्य तावदेव चिर'मित्यादिश्रुतेः ॥१९॥

इति श्रीब्रह्मसूत्रदीपिकाया चतुर्थाऽध्यायस्य प्रथमः पादः ।

———;o:———

प्रथमपादे सगुणनिर्गुणविद्याविदो ऽनारब्धकार्ययोः क्षयः आरब्धकार्ययोर्यावदवस्थानं तावन्न मुक्तिः तत्क्षये च विदेहकैवल्यमिति स्थितं, द्वितीये तयोर्न सगुणविदः करणानां लये नाऽविद्वदुत्क्रान्तौ कश्चन विशेष इत्युच्यते। ततश्च तमेव क्रममाश्रित्य वाचो वृत्तेर्लयमाह—

वाङ्मनसि दर्शनाच्छब्दाच्च ॥ १ ॥

'अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवताया'मित्यत्राऽत्र वृत्तिर्मनसि संपद्यते।

कस्मात्? दर्शनात्। मरणादेव वाचः प्रथमोपसंहारस्य वृत्तिवृत्तिमतोरभेदेन वाङ्मनसि शब्दात्। च कारो ऽप्रकृतत्वमाह ॥ १ ॥

अत एव च सर्वाण्यनु ॥ २ ॥

'इन्द्रियैर्मनसि संपद्यमानै'रित्यत्र सर्वाणीन्द्रियाणि वृत्तिभिर्मनो ऽनुवर्त्तन्ते अत एव दर्शनात् शब्दाच्चेति। चकारो ऽत्रापि पूर्ववत् ॥ १ ॥

पूर्वाधिकरणे मनसो वाचः कारणत्वाऽभावात् तत्र तस्याः सर्वात्मना न लय इत्युक्तम्, अत्र तु मनसः परम्परया विकारत्वादभूते प्राणे लयः स्यादिति प्रत्युदाहरणेनाक्षिप्य समाधत्ते—

तन्मनः प्राणउत्तरात् ॥ ३ ॥

उक्तं मनो वृत्त्या प्राणे विलीयते। कुतः? 'मनः प्राणे' इत्युत्तराद् वाक्यात् ॥ ३ ॥

पूर्वाधिकरणे प्राणस्याऽब्विकारत्वात् विकारे विकाराणां न सर्वात्मना लय इत्युक्तं न्यायेन, अत्र तु न्यायाऽभावात् 'प्राणस्तेजसी'ति श्रुतेस्तेजस्येव तस्य लय इति प्रत्युदाहरणेनाक्षिप्य समाधत्ते—

सो ऽध्यक्षे तदुपगमादिभ्यः ॥ ४ ॥

स प्राणस्तदध्यक्षे जीवे वृत्त्या प्रलीयते तस्मिन्नध्यक्षे प्रविलयस्या'ऽऽत्मानमन्तकाले सर्वे प्राणा अभिसमायन्ती'त्यादिना ऽभ्युपगमादविशेषेण। आदिशब्देन 'तमुत्क्रामन्तं सर्वे प्राणा' इत्यादिविशेषादपि ॥ ४ ॥

कथं तर्हि 'प्राणस्ते जसी'ति श्रुतिरित्यत आह—

भूतेषु तच्छ्रुतेः ॥ ५ ॥

स प्राणसंवृत्तो ऽध्यक्षस्तेजःसहचरितेषु भूतेषु देहबीजभूतेषु सूक्ष्मेषु व्यवतिष्ठतइत्यवगन्तव्यं 'प्राणस्तेजसी'ति श्रुतेः ॥ ५ ॥

एककस्मिंस्तेजसि श्रुतेः कथं तेजःसहचरितेष भूतेषु? इत्यत आह—

नैकस्मिन् दर्शयतो हि ॥ ६ ॥

नैकस्मिन्नेव तेजसि शरीरान्तरप्राप्तिवेलायां जीवो ऽवतिष्ठते। कुतः? हि यस्मात् दर्शयतः श्रुतिस्मृती 'पृथवीमय' इत्याद्या श्रुतिः,

स्मृति 'रयं व्योममात्रा' इत्याद्या। प्रश्नप्रति वचने च 'आपः पुरुषवचस' इति ॥ ६ ॥

पूर्वाधिकरणे प्राणस्यात्मद्वारा तेजसि वृत्तिलय उक्तः, स विदुष एवेत्याक्षिप्य समाधत्ते—

समाना चासृत्युपक्रमादमृतत्वं चाऽनुपोष्य ॥ ७ ॥

समाना चैवोत्क्रान्ति'र्वाङ् मनसी'त्याद्या विद्वदविदुषोरासृत्युप्रक्रमात् आ उत्तरमर्गोपक्रमात्। ननु विदुषो ऽमृतत्वं प्राप्तस्य कुतो गमन?मित्यत आह–अमृतत्वं चाऽनुपोष्य अदग्धाऽविद्याऽऽदिक्लेशबीजानि। इदममृत्वमपि ॥ ७ ॥

पूर्वाधिकरणे ब्रह्मविदो ।विदुषश्च समानोत्क्रान्तिरुक्ता, सैवाऽनुपपन्ना, तेजःकार्यस्य ब्रह्मणि कारणे सर्वात्मना लयोपपत्तेरित्याक्षिप्य समाधत्ते—

तदापीतेः संसारव्यपदेशात् ॥ ८ ॥

तत्तेजआदि भूतसूक्ष्मं श्रोत्रादिकरणाश्रयभूतम् आ पीतेरा संसारादा मोक्षादवतिष्ठते 'योनिमन्ये प्रपद्यन्ते' इत्यादिना संसारव्यपदेशात् ॥ ८ ॥

कुतस्तर्ह्युत्क्रमे तेजो न दृश्यते ? इत्यत आह—

सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॥ ९ ॥

चकारस्त्वर्थस्तेजसो दर्शनं व्यावर्तयति। तत्तेजः सूक्ष्मं स्वरूपतः परिणामतश्च। तदाह–प्रमाणतश्च। कुतः ? नाडीनिष्क्रमणादिभ्यस्तथा सूक्ष्मस्योपलब्धेः ॥ ९ ॥

ननु सूक्ष्मशरीरस्य स्थूलशरीरान्तरत्वात् तन्नाशे नाश इत्यत आह—

नोपमर्देनाऽतः ॥ १० ॥

अत एव सूक्ष्मत्वात् स्थूलशरीरस्योपमर्देन सूक्ष्मशरीरं नोपमर्द्यते ॥ १० ॥

नन्वस्मिन् एव शरीरे ऊष्मण उपलक्ष्यमानत्वात्ततो ऽतिरिक्तं तेजः कल्पनयिमित्यत आह—

अस्यैव चोपपत्तेरेष ऊष्मा ॥ ११ ॥

अस्यैव सूक्ष्मशरीरस्यैवोष्मा सूक्ष्मशरीरे सत्युपलब्धेरसत्यनुपलब्धेरित्युपपत्तेः। चकारः श्रुतिमप्याह 'ऊष्मैवैष' इत्यादिकाम् ॥११॥

पूर्वाधिकरणे संसारव्यपदेशेन तेजसो वृत्तिलय उक्तः। अत्रापि मरणव्यपदेशाद्देह्युपादानोत्क्रान्तिप्रतिषेध इति सिद्धान्तोपक्रमेण सूत्रेणाक्षिपति—

प्रतिषेधादिति चेन्न शारीरात् ॥ १२ ॥

सूत्राऽवयवेन सिद्धान्तमाह—'न तस्य प्राणा उत्क्रामन्ती'त्यस्मात्प्रतिषेधाद्विद्यावतो न गमनमिति चेत्तन्न। कुतः? शारीरात्। जीवादयं गमनप्रतिषेधो न शरीरात् ॥ १२ ॥

एवं शङ्किते पुना राद्धान्तमाह—

स्पष्टो ह्येकेषाम् ॥ १३ ॥

शरीरादात्मनः प्राणानां गमनम्। कुतः? हि यस्मात् एकेषां शाखिनां शरीरस्यैव स्पष्टो ऽपादानभावः श्रूयते 'स उच्छ्रयती'त्यादिना देहस्यैवापाऽदानतयोपलम्भात् ॥ २३ ॥

स्मर्यते च ॥ १४ ॥

स्मर्यते ऽपि महाभारते गत्युत्क्रान्त्योरभावः 'सर्वभूतात्मे'त्यादिना ॥ १४ ॥

पूर्वाधिकरणे 'उच्छ्रयती'त्यादिना देहस्य प्रकृतत्वात्तदपादानोत्क्रान्तिप्रतिषेधः कृत,स्तद्वदत्रापि 'गताः कलाः पञ्चदश प्रतिष्ठा' इति वचनादिन्द्रियाणां भूतेषु लय इत्याक्षिप्य समाधत्ते—

तानि परे तथा ह्याह ॥ १५ ॥

तानीन्द्रियाणि भूतानि च निर्गुणविद्यावतः परे परमात्मनि प्रलीयन्ते कुतः? हि यस्मात् तथाह श्रुतिः 'पुरुषं प्राप्याऽस्तं गच्छन्ती'ति ॥ १५ ॥

पूर्वाधिकरणे विदुष इन्द्रियाणां परस्मिन् प्रविलय उक्तः, स त्वनुपपन्नः, वृत्त्या ऽत्राप्युपपत्तेरित्याक्षिप्य समाधत्ते—

अविभागो वचनात् ॥ १६ ॥

इन्द्रियाणां भूतानां च ब्रह्मणि प्रविलये ब्रह्मणा ऽविभाग ऐक्यं निर्गुणविद्यावतो वृत्तिमतामेषां प्रविलय इत्यर्थः । कुतः ? वचनात् 'भिद्येते चैषां नाम रूपे' इत्यादेः ॥ १६ ॥

व्यवहिताधिकरणे आसृत्युपक्रमाद्विदुषो ऽविदुषश्च समाना गतिरुक्ता, सा ऽनुपपन्ना, विदुषोप्यनियतनाडीगमनादित्याक्षिप्य समाधत्ते । अथ वा पूर्वाधिकारणे निर्गुणविद्यावतो ऽविभागेन परस्मिन्नन्द्रियप्रलय इत्युक्तः, तद्वत्सगुणविद्यावतो ऽपि स स्यादिति दृष्टान्तनाक्षिप्य समाधत्ते—

तदोको ऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दाऽनुगृहीतः शताधिकया ॥ १७ ॥

तस्य विज्ञानात्मन ओक आयतनं हृदयं हृदयस्याऽग्रस्य ज्वलनेन प्रकाशितानि द्वाराणि यस्य सोयं तत्प्रकाशितद्वारः । सर्वोपि जन्तुश्चक्षुरादिभ्यः स्थानेभ्य उत्क्रामति, विद्वांस्तु हार्देन ब्रह्मणा ऽनुगृहीतः शताऽधिकमूर्धन्यया नाड्या । कुतः ? विद्यासामर्थ्यादुपासनासामर्थ्यात् । तत्सामर्थ्यादप्यनयैव गच्छतीति को नियम? इत्यत आह—तच्छेषगत्यनुस्मृतियोगाच्च । तस्या विद्यायाः शेषभूता मूर्धन्यनाडीगतिरुत्तरमार्ग इति यावत् । तस्या अनुस्मृतिरनुस्मरणं तस्य योगस्तस्मादपि । चकारः सामर्थ्यमनाक्षिप्याह ॥ १७ ॥

पूर्वाधिकरणे मूर्धन्यनाड्या सगुणविद्याविदुत्क्रामतीत्युक्तं, तद्दिवसे मृतस्यैव न रात्रौ, तत्र रश्मीनामभावादित्याक्षिप्य समाधत्ते—

रश्म्यनुसारी ॥ १८ ॥

'अथैतैरेव रश्मिभिरूर्ध्वमाक्रमते' एष दिवसे रात्रौ च रश्म्यनुसारी याति ॥ १८ ॥

निशि नेति चेन्न संबन्धस्य यावद्देहभावित्वा-द्दर्शयति च ॥ १९ ॥

निशि रात्रौ रश्म्यनुसारी न यातीति चेत्तन्न, रश्मिसंबन्धस्य यावद्देहभावित्वात्। 'अमुष्मा' दित्यादिना दर्शयति। चकारो दिनाच्च निशासु रश्मीनां स्पर्शोपलम्भमाह ॥ १९ ॥

पूर्वाधिकरणे रात्रौ रश्मीनां सद्भावेनोत्तरमार्गगमनमुक्तं, तद्दक्षिणायने मृतस्याऽनुपपन्नमित्याक्षिप्य समाधत्ते—

अतश्चाऽयनेऽपि दक्षिणे ॥ २० ॥

अतश्चाऽत एव तस्याऽनियतकालत्वात् अयने दक्षिणेऽपि विद्वान् विद्याफलमाप्नोत्येव ॥ २० ॥

'यत्र काले' इत्यादिना दक्षिणायने मृतानां पुनरावृत्तिः स्मर्यत इत्यत आह—

योगिनः प्रति च स्मर्यते स्मार्ते चैते ॥२१॥

योगिनः स्मार्तयोगविदस्तान् प्रति स्मर्यते कालविनियोगः स्मार्ते चैते योगसांख्ये। आद्यश्चकारो ब्रह्मविदः प्रत्यस्मरणमाह। द्वितीयस्तयोरश्रौतत्वमाह। आतिवाहिकाऽङ्गीकारेण कृत्वा चिन्तेयम् ॥ २१ ॥

इति श्रीब्रह्मसूत्रदीपिकायां चतुर्थाऽध्यायस्य द्वितीयः पादः।

—:o:—

पूर्वपादे उत्क्रान्तिर्निरूपिता, इदानीमुत्क्रान्तस्य विदुषोऽर्चिरादिका निरूप्यते—

अर्चिरादिना तत्प्रथितेः ॥ १ ॥

सर्वो ब्रह्मप्रेप्सुरर्चिरादिनैव मार्गेण रंहति। कुतः? तत्प्रथितेः। तस्य मार्गस्य विदुषां प्रथितेः प्रसिद्धेः 'ये चेमेऽरण्ये' इत्यादिना॥ १॥

पूर्वाधिकरणे विदुषोऽर्चिरादिमार्गेण गमनमुक्तं, स मार्गो न नियतः, वायोरेतस्मिन्नश्रवणादित्याक्षिप्य समाधत्ते—

वायुमब्दादविशेषविशेषाभ्याम् ॥ २ ॥

वायुमब्दात्संवत्सराद्देवलोकं प्राप्येति शेषः। कुतः? अविशेषविशेषाभ्यां 'स वायुलक्षक'मित्यविशेषः, 'स वायुमागच्छती'त्युक्त्यनन्तरं तद्धत्तेन मार्गेण स आगच्छतीति विशेषमाह, ताभ्याम् ॥ २ ॥

पूर्वाधिकरणे वायोरब्दानन्तर्यमुक्तं, तथापि लोकादीनामर्चिरादिसन्निवेशानुपपत्तिस्तदवस्था, नियामकाऽभावादिति प्रत्युदाहरणेनाक्षिप्य समाधत्ते—

तडितोऽधिवरुणः सम्बन्धात् ॥ ३ ॥

तडितो विद्युल्लोकादधि अनन्तरं वरुणलोकः वरुणस्य विद्युता सम्बन्धादिन्द्रप्रजापतिलोकयोर्वरुणाऽधि 'आगन्तुकानामन्ते निवेश' इति न्यायेन सन्निवेशः ॥ ३ ॥

पूर्वाधिकरणे ऽर्चिरादिमार्गे वरुणादीनां तडितो ऽधिसम्बन्ध उक्तः सूचितमार्गो ऽवस्थितस्तथापि तस्मिन्मार्गे ऽर्चिरादिभोगभूमिषु गन्तुं विद्वानेकाकी प्रभुस्ततो न नियतमार्गो ऽयमित्याक्षिप्य समाधत्ते—

आतिवाहिकस्तल्लिङ्गात् ॥ ४ ॥

अतिवहन्तीत्यातिवाहिकाश्चेतना देवा अर्चिरादयः। कुतः? तल्लिङ्गात्। तेषां चेतनानां 'तत्पुरुषो ऽमानव' इति एकीकरणेन लिङ्गात् ॥ ४ ॥

नन्वत्रैवाऽयं पुमान्नेता ऽस्त्वित्यत आह—

उभयव्यामोहात्तत्सिद्धेः ॥ ५ ॥

उभयस्य नेतॄणां संपिण्डितकरणत्वेन स्थानानां स्वयमेव व्यामोहो ऽचेतनत्वं, तस्मान्नेतॄणां चेतनानां सिद्धिः। तस्मान्नात्रैव नेता इति शेषः ॥ ५ ॥

वैद्युतेनैव ततस्तच्छ्रुतेः ॥ ६ ॥

वरुणादिलोके तेषां नेतृणामभावात् पूर्वमपि चेतना न स्युरित्यत आह–वैद्युतेनैवाऽमानवेनैव तत्तस्मात् विद्युल्लोकादूर्ध्वं नीयते। कुतः? तच्छ्रुतेः। तस्याऽमानवस्य पुरुषस्य नेतृत्वस्य 'तान् वैद्युता'दित्यादिश्रुतेः ॥ ६ ॥

पूर्वाधिकरणे आतिवाहिकैः सगुणविद्याविदो नीयन्ते इत्युक्तं, तदनुपपन्नं, एतस्य प्राप्यस्य ब्रह्मणः परत्वेन निर्गुणविद्याविदप्यत्रैव गच्छतीत्याक्षिप्य समाधत्ते—

कार्यं बादरिरस्य गत्युपपत्तेः ॥ ७ ॥

यदर्चिरादिना गच्छन्तीति, ब्रह्म तत्कार्यं बादरिराचार्यो मन्यते। कुतः ? अस्य कार्यस्य गतेरर्चिरादिगमनस्य तत्रोपपत्तिः सम्भवो गत्युपपत्तिः। तस्याः ॥ ७ ॥

ननु नाऽयं तर्कगम्यो ऽर्थ इत्यत आह—

विशेषितत्वाच्च ॥ ८ ॥

'ब्रह्मलोका'नित्यादिना। चकारस्तर्कस्य श्रुतिमूलस्य कर्तव्यतामाह ॥ ८ ॥

ननु कार्यस्यापि ब्रह्मशब्दो नोपपद्यते इत्यत आह—

सामीप्यात्तु तद्व्यपदेशः ॥ ९ ॥

तुशब्दस्तत्र ब्रह्मशब्दाऽनुपपत्तिं वारयति। का तर्ह्यत्रोपपत्ति?-रित्यत आह–सामीप्यात्। कार्यस्य ब्रह्मणः परेण ब्रह्मणा। अतस्तस्य ब्रह्मशब्दस्य व्यपदेशात् ॥ ९ ॥

ननु कार्यप्राप्तावनावृत्तिर्नोपपद्यतइत्यत आह—

कार्यात्यये तदध्यक्षेण सहाऽतः परमभिधानात् ॥ १० ॥

कार्यस्य ब्रह्मलोकस्याऽत्यये विनाशे तस्य ब्रह्मलोकस्याऽध्यक्षेण परमेष्ठिना सहाऽतः परमेष्ठिनः परं ब्रह्म भवति। कुतः ? अनावृत्त्याद्यभिधानात् ॥ १० ॥

न त्विदं विश्वास्यमेवेत्यत आह—

स्मृतेश्च ॥ ११ ॥

ब्रह्मणा सहेत्यादयाया:। चशब्दाच्छ्रुतेरपि 'ते ब्रह्मलोके' इत्यादयाया: ॥ ११ ॥

पूर्वपक्षमाह—

परं जैमिनिर्मुख्यत्वात् ॥ १२ ॥

ब्रह्मशब्दस्य परब्रह्मणि मुख्यत्वात् यद् गम्यमर्चिरादिना तत्परमेवेति जैमिनिराचार्य आह ॥ १२ ॥

नन्वनुपपत्तेर्मुख्यार्थपरित्याग इत्यत आह—

दर्शनाच्च ॥ १३ ॥

'तयोर्ध्वमायन्नमृतत्वमेती'त्यमृतत्वप्राप्तेः। चकारो मुख्यार्थाऽनुपपत्तेरभावमाह ॥ १३ ॥

'प्रजापतेः सभावेश्मे' त्यादिना स्पष्टं कार्यब्रह्माऽवगम्यते इत्यत आह—

न च कार्ये प्रतिपत्त्यभिसन्धिः ॥ १४ ॥

'वेश्म प्रपद्यते' इति प्रतिपत्तेरभिसन्धिः कार्ये ब्रह्मणि न च, नैव। नामरूपनिर्वाहकस्य ब्रह्मणः प्रकृतत्वात् ॥ १४ ॥

पूर्वाधिकरणे ऽर्चिरादिप्राप्यस्य ब्रह्मणः कार्यत्वमुक्तम्, एवं चेत्प्रतीकोपासकैरपि तद् गम्यमित्याक्षिप्य समाधत्ते—

अप्रतीकावलम्बनान्नयतीति बादरायण उभयथा ऽदोषात्तत्क्रतुश्च ॥ १५ ॥

प्रतीकाऽवलम्बना ये न भवन्ति ते ऽप्रतीकाऽवलम्बनाः तान् प्रतीकव्यतिरिक्तानमानवपुरुषो नयतीति बादरायण आचार्यो मन्यते। न च नयने न्यायविरोध इत्यत आह–उभयथा ऽदोषात्। उभयथा प्रतीकालम्बनानां नयने ऽन्येषां नयने न्यायस्य प्रतीकावलम्बनव्यतिरिक्तविषयत्वेनाऽदोषात्। अत्र को हेतु?रित्यत आह–तत्क्रतुश्च। तस्य ब्रह्मणः क्रतुः संकल्पः तत्क्रतुर्ब्रह्मप्राप्तौ हेतुः। चशब्दस्तद्भावप्राप्तौ ॥ १५ ॥

ननु प्रतीकोपासनानां फलाऽभावात् ब्रह्मलोक एव फलं फल्प्य-मित्यत आह—

विशेषं च दर्शयति ॥ १६ ॥

'यावन्नाम्नो गत'मित्यादिना प्रतीकोपासनेषु फलस्य । चकारोऽश्रुतफलेषु ब्रह्मलोकः फलं कल्प्यामिति कल्पनाऽभावमाह ॥ १६ ॥

इति ब्रह्मसूत्रदीपिकायां चतुर्थाऽध्यायस्य तृतीयः पादः ।

———o———

पूर्वपादे सगुणविद्याविदोऽर्चिरादिगतिः कार्यब्रह्मप्राप्तिश्च फल-मुक्त,मिदानीं निर्गुणविद्याविदस्तत्संपत्तिरुच्यते—

संपद्याविर्भावः स्वेन शब्दात् ॥ १ ॥

परं ज्योतिरुपसंपद्य स्वेन केवलेनैवात्मनाऽऽविर्भवति । कुतः ? 'स्वेन रूपेणाऽभिनिष्पद्यते' इति स्वशब्दात् । कः पुनर्विशेषः पूर्वोत्तरयोः स्वरूपयो?रित्यत आह—

मुक्तः प्रतिज्ञानात् ॥ २ ॥

योऽत्राऽभिनिष्पद्यतइत्युक्तः स सर्वसम्बन्धविनिर्मुक्तः । कुतः ? 'य आत्मे' त्यादिना तादृशस्यैव प्रतिज्ञानात् ॥ २ ॥

'परं ज्योतिरुपसंपद्ये'ति ज्योतिषि सम्पत्तेः कथमात्मरूपेणाऽऽविर्भावि? इत्यत आह—

आत्मा प्रकरणात् ॥ ३ ॥

ज्योतिःशब्देनाऽऽत्मा ऽभिधीयते । कुतः ? प्रकरणात् । 'य आत्मे'त्यादेः ॥ ३ ॥

पूर्वाधिकरणे स्वेन सता संपत्तिरुक्ता, सा सुषुप्तिवत्स्यादित्याक्षिप्य समाधत्ते—

अविभागेन दृष्टत्वात् ॥ ४ ॥

परं ज्योतिरुपसंपद्य स्वेन रूपेणाऽभिनिष्पद्यते यः स त्वविभागेन । कुतः ? 'तत्त्वमसी'त्यादेर्दृष्टत्वात् ॥ ४ ॥

पूर्वाधिकरणे अविभागेन ब्रह्मसंपत्तिरुक्ता, तद्ब्रह्म स्वभावेन सविशेषमित्याक्षिपति—

ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥ ५ ॥

ब्राह्मेण स्वेन रूपेणाऽपहतपाप्मत्वादिना सर्वज्ञत्वादिना च निष्पद्यते इति जैमिनिराचार्यो मन्यते । कुतः? उपन्यासादिभ्यः । उपन्यासो 'ऽयमात्मे' त्यादिशब्देन 'स तत्र पर्येती'त्यैश्वर्यादिभ्यः ॥ ५ ॥

चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः ॥ ६ ॥

चिन्मात्रेण चैतन्यमेवाऽऽत्मनो रूपमतश्चैतन्यमात्रेणैवाऽभिनिष्पद्यते । तदेव कुत ? इत्यत आह-'एवं वा अरे' इत्यादिना तदात्मकत्वात् चैतन्यमात्रात्मकत्वात् । आत्मनो वस्तुतः सत्यसङ्कल्पत्वादीनामुपाधिधर्मत्वादित्यौडुलोमिराचार्यो मन्यते ॥ ६ ॥

एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः ॥ ७ ॥

एवमपि पारमार्थिकचैतन्यरूपेण स्वरूपाऽभ्युपगमे ऽपि पूर्वस्याऽप्युपन्यासादिभ्यो ऽवगतस्य ब्राह्मस्यैश्वर्यरूपस्य भावाद्व्याख्यानादप्यविरोधं बादरायण आचार्यो मन्यते, बादरायणमतं सिद्धान्तः ॥ ७ ॥

पूर्वाधिकरणे ब्रह्मणि विशेषाऽसम्भवात्सविशेषप्रकृतावपि सविशेषत्वश्रुतिरौपाधिकविशेषे व्यवस्थापिता, नैवं योगी सङ्कल्पाऽतिरिक्तसाधनवानिति प्रत्युदाहरणेनाक्षिप्य समाधत्ते—

संकल्पादेव तच्छ्रुतेः ॥ ८ ॥

पित्रादयः सङ्कल्पादेव समुत्तिष्ठन्ति न तु निमित्तान्तरात् । कुतः? तस्य 'सङ्कल्पादेवाऽस्य पितरः समुत्तिष्ठन्ती'ति तादृशस्य समुत्थानस्य श्रुतेः ॥ ८ ॥

अत एव चाऽनन्याधिपतिः ॥ ९ ॥

अत एव सत्यसङ्कल्पत्वादेवाऽनन्याऽधिपतिश्च । अस्य नाऽन्योऽधिपतिरपि ॥ ६ ॥

पूर्वाधिकरणे संकल्पाऽतिरिक्तसाधनानां सगुणविद्याविदो योगिनोऽसाधनत्वमुक्तं तच्छ्रुतेः । नैवमत्र श्रुतिरस्ति, अतोऽपि मनोऽतिरिक्तानां साधनानामसत्त्वमेवेति प्रत्युदाहरणेनाक्षिप्य पक्षान्तरमाह—

अभावं बादरिराह ह्येवम् ॥ १० ॥

मनोऽतिरिक्तानां शरीरेन्द्रियादीनामभावं बादरिराचार्यो मन्यते । कुतः ? हि यस्मात् एवमाह श्रुतिः 'स एवैतानी'त्यादिना ॥ १० ॥

भावं जैमिनिर्विकल्पाऽऽमननात् ॥ ११ ॥

जैमिनिराचार्यो मनोवच्छरीरस्यापि सेन्द्रियस्य भावं मुक्तं प्रति मन्यते । कुतः ? 'स एकधा भवती'त्यादिना विकल्पस्याऽऽमननात् ॥ ११ ॥

द्वादशाहवदुभयविधं बादरायणोऽतः ॥१२॥

बादरायणो मुनिराचार्योऽत एव लिङ्गदर्शनादुभयविधं मन्यते भावमभावं द्वादशाहवत् । यथा द्वादशाहः सत्रमहीनश्च तद्वत् । अतः सिद्धान्तः ॥ १२ ॥

ननु शरीराऽभावे सुषुप्तिवन्न विषयोपलम्भ इत्यत आह—

तन्वभावे सन्ध्यवदुपपत्तेः ॥ १३ ॥

शरीराऽभावे सन्ध्ये यथोपलब्धिमात्राः पित्रादिकामा भवन्ति एवं मोक्षेऽपि स्युः, तथा सत्युपपत्तेः ॥ १३ ॥

भावे जाग्रद्वत् ॥ १४ ॥

पूर्वाधिकरणे 'स एकधा भवति त्रिधा भवती'ति वाक्योदाहरणेनाऽनेकशरीरग्रहणमुक्तं, तत् क्रमेण न युगपदित्याक्षिप्य समाधत्ते—

प्रदीपवदावेशस्तथा हि दर्शयति ॥ १५ ॥

शरीरान्तराणां स्वीकारे शरीरान्तरात् शरीरान्तरेष्वावेशः प्रदीपवत् । यथैकस्य प्रदीपस्य प्रदीपसहस्रेषु आवेशः तद्वत् । कुत

एतत्? हि यस्मात् तथा दर्शयति श्रुतिः 'स एकधा भवती'त्यादिना ॥ १५ ॥

स्वाप्ययसंपत्त्योरन्यतराऽपेक्षमाविष्कृतं हि ॥ १६ ॥

स्वाप्ययः सुषुप्तिः संपत्तिस्तयोरन्यतरापेक्षं 'यत्र त्वस्ये'त्यादि प्रतिषेधवचनम् । कुतः? हि यस्मात् सुषुप्तौ मुक्तौ वा इदमाविष्कृतमुदाहृतम् ॥ १६ ॥

पूर्वाधिकरणे शरीरेन्द्रियाणां कर्तृत्वमुक्तं योगिनः, तद्वज्जगद्व्यापारकर्तृत्वमपीति दृष्टान्तेनाक्षिप्य समाधत्ते—

जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च ॥ १७ ॥

योगिनां भौतिकेष्वेव स्वातन्त्र्यं न भूतेष्वित्याह-जगद्व्यापारवर्जम् । कुतः ? प्रकरणात् । सर्वभूतसृष्टिवाक्येषु परमात्मनः प्रकृतत्वात् । न च ते ऽपि परमात्मवत् प्रकृता इत्याह-असन्निहितत्वाद्योगिनाम् । च कारो महाभूतसृष्टौ योगिनामशक्यत्वमप्याह ॥ १० ॥

प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः ॥ १८ ॥

प्रत्यक्षोपदेशात् 'आप्नोति स्वाराज्य'मित्यादेर्योगिनां जगद्व्यापारस्वातन्त्र्यमिति चेन्न । कुतः? आधिकारिको य आदित्यमण्डलस्थस्तस्योक्तेः ॥ १८ ॥

ननूपाधिव्यतिरिक्तस्य ब्रह्मणो ऽसत्त्वे कुतो ऽयं विभाग? इत्यत आह—

विकारावर्ति च तथा हि स्थितिमाह ॥ १९ ॥

विकारावर्त्यपि नित्यमुक्तं परमेश्वरं न केवलविकारमात्रगोचरं सावित्रमण्डलाद्याधिष्ठानम् । तथा हि यस्मात् स्थितिमाह आम्नायः 'एतावानस्य महिमे'त्यादिना ॥ १९ ॥

नन्वत्र पादत्रयमुपलभ्यते न त्वन्यत्किञ्चिदित्यत आह—

दर्शयतश्चैवं प्रत्यक्षाऽनुमाने॥ २१ ॥

एवं विकारावर्ति रूपं श्रुतिस्मृती दर्शयतः। श्रुति'र्न तत्र सूर्य' इत्याद्या। स्मृति'र्न जायते, इत्याद्या। चकारो मुक्तेरपि सत्त्वमाह॥२०॥

ननु परमेश्वरस्य जगत्कर्तृत्वमुक्तं, तत्समानशीलाश्च योगिन इत्यत आह—

भोगमात्रसाम्यलिङ्गाच्च ॥ २१ ॥

अनादिसिद्धेन परमेश्वरेण भोगमात्रं समानं योगिनां यथैतदेवलिङ्गं योगिनां जगद्व्यापाराऽभावे। चकारादनेकेश्वरादिदोषश्च॥२१

नन्वेवं सति साऽतिशयत्वात् अन्तवत्त्वमैश्वर्यस्य स्यात्ततश्चैवमावृत्तिरिति चेत्—

अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥२२॥

ब्रह्मलोकप्राप्तानां तेषां न पुनरावृत्तिः। कुतः? 'न स पुनरावर्तते' इत्यादेः शब्दात्। सूत्राऽभ्यासः शास्त्रसमाप्तिं द्योतयति ॥ २२ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्याऽऽनन्दात्मपज्यपाद-
शिष्यस्य परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करानन्द-
भगवतः कृतौ ब्रह्मसूत्रदीपिकाया चतुर्था-
ऽध्यायस्य चतुर्थः पादः॥
संपर्णश्च चतुर्थो ऽध्यायः।
समाप्तश्चायं ग्रन्थः॥

शुभम्।

——:o:——

BENARES SANSKRIT SERIES;

A
COLLECTION OF SANSKRIT WORKS
EDITED BY THE
PANDITS OF THE BENARES SANSKRIT COLLEGE,
UNDER THE SUPERINTENDENCE OF
R. T. H. GRIFFITH, M. A., C. I. E.
AND
G. THIBAUT, PH. D.
Nos. 91 & 112.

ब्रह्मसूत्रदीपिका

श्रीमच्छङ्करानन्दभगवद्भिरचिता ।

तथा—

तत्त्वानुसन्धानं नाम वेदान्तप्रकरणम्

प. प. श्रीमन्महादेवानन्दसरस्वतीरचितम् ।

BRAHMASÛTRADÎPIKÂ

BY ŜRÎ ŜANKARÂNANDA,

And TATTVÂNUSANDHÂNA

BY ŜRÎ MAHÂDEVÂNANDASARASWATÎ,

EDITED BY

Râma Ŝâstrî Tailanga,

PROFESSOR, GOVT. SANSKRIT COLLEGE, BENARES.

BENARES:

Published by the Proprietors Messrs. Braj B. Das & Co.,
AND SOLD BY H. D. GUPTA,
Secretary, Chowkhamba Sanskrit Book Depôt.

Printed at the Vidyâ Vilâs Press & Tara Printing Works,
BENARES.

1906.

Registered under Act XXV. of 1867. (ALL RIGHTS RESERVED.)

तत्त्वाऽनुसन्धानं नाम वेदान्तप्रकरणम् ।

श्रीगणेशाय नमः ।

ब्रह्माहं यत्प्रसादेन मयि विश्वं प्रकल्पितम् ।
श्रीमत्स्वयंप्रकाशाख्यं प्रणौमि जगतां गुरुम् ॥ १ ॥

देहो नाहं श्रोत्रवागादिको न
नाहं बुद्धिर्नाऽहमध्यासमूलम् ।
नाहं सत्याऽऽनन्दरूपश्चिदात्मा
मायासाक्षी कृष्ण एवाऽहमस्मि ॥ २ ॥

अथ मोक्षस्य वाक्यार्थज्ञानाऽधीनत्वात्तदर्थं तत्पदार्थं निरूपयामः । तत्पदार्थस्य लक्षणं द्विविधम् । कूटस्थलक्षणं स्वरूपलक्षणश्चेति । सृष्टिस्थितिलयकारणत्वं तटस्थलक्षणम् । "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ती"ति श्रुतेः । तदुक्तं भगवता सूत्रकारेण "जन्माद्यस्य यत" इति । सत्यज्ञानाऽऽनन्दाः स्वरूपलक्षणम् । "सत्यं ज्ञानमनन्तं ब्रह्म" "आनन्दो ब्रह्मेति व्यजानात्" इत्यादिश्रुतेः । उक्तं च "आनन्दादयः प्रधानस्ये"ति ।

स च द्विविधः । वाच्यार्थो लक्ष्यार्थश्चेति । मायोपहितं चैतन्यं तत्पदवाच्यार्थः । मायाविर्निमुक्तं चैतन्यं तत्पदलक्ष्यार्थः ।

अथ केयं माया ? शृणु । यथा शुक्त्यादौ रजतादि कल्पितं तथा चेतने ऽचेतनं कल्पितम् । "इदं सर्वं यदयमात्मा" "आत्मैवेदं सर्वम्" "ब्रह्मैवेदं सर्वम्" "पुरुष एवेदं विश्वम्" "सर्वं खल्वि-

दं ब्रह्म" "वासुदेवः सर्वम्" "नारायणः सर्वमिदम् पुराण" इत्यादिश्रुतिस्मृतिवाक्यशतैरचेतनस्य चेतनव्यतिरेकेणाऽभावप्रतिपादनात् । चेतनाचेतनयोरभेदायोगाच्च । चेतनं नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दाऽद्वयं ब्रह्म । अचेतनमज्ञानादिजडजातम् । अज्ञानं त्रिगुणात्मकं सदसद्भ्यामनिर्वचनीयम् भावरूपं ज्ञाननिवर्त्यम् । अहं ब्रह्म न जानामीत्यनुभवात् । "देवात्मशक्तिं स्वगुणैर्निगूढा" मित्यादिश्रुतेः । "अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः" "ज्ञानेन तु तदज्ञानं येषां नाशितमात्मन" इति स्मृतेश्च ।

तच्चाऽज्ञानं द्विविधं मायाऽविद्याभेदात् । शुद्धसत्त्वप्रधानं तन्मायेत्युच्यते । मलिनसत्त्वप्रधानं विद्येत्युच्यते । "जीवेशावाभासेन करोति माया चाऽविद्या च स्वयमेव भवती" ति श्रुतेः ।

अथ वा ऽज्ञानस्य शक्तिर्द्विविधा, ज्ञानशक्तिः क्रियाशक्तिश्चेति । रजस्तमोभ्यामनभिभूतसत्त्वं ज्ञानशक्तिः । "सत्त्वात्संजायते ज्ञानमिति स्मृतेः । क्रियाशक्तिर्द्विविधा, आवरणशक्तिर्विक्षेपशक्तिश्चेति । रजस्सत्त्वाभ्यामनभिभूतं तम आवरणशक्तिः । तदुक्तम् ! " कृष्णं तम आवरणात्मकत्वात् " इति । सा च नास्ति न प्रकाशते इति व्यवहारहेतुः । तथा चोक्तम् । "न भाति नास्ति कूटस्थ इत्यापादनमावृति"रिति । तमःसत्त्वाभ्यामनभिभूतं रजो विक्षेपशक्तिः । " रजसो लोभ एव चेति " स्मृतेः । लोभादीनां विक्षेपकत्वं प्रसिद्धमेव । सा चाकाशादिप्रपञ्चोत्पत्तिहेतुः । उक्तं च । " विक्षेपशक्तिर्लिङ्गादि ब्रह्माण्डान्तं जगत् सृजे" दिति । तथा च पूर्वोक्ताऽज्ञानमावरणशक्तिप्रधानं सदविद्येत्युच्यते । अज्ञानं विक्षेपशक्तिप्रधानं सन्मायेत्युच्यते । एतदभिप्राया स्मृतिरपि ।

"तरत्यविद्यां विततां हृदि यस्मिन्निवेशिते ।
योगी मायाममेयाय तस्मै विद्यात्मने नमः" ॥

इत्येवंरूपा द्रष्टव्या ।

एवं च मायोपहितचैतन्यमीश्वरो जगत्कारणमन्तर्यामीत्युच्यते । स एव तत्पदवाच्यार्थः । अविद्योपहितं चैतन्यं जीवः प्राज्ञ इत्युच्यते । तदुक्तम् ।

"तमोरजःसत्त्वगुणा प्रकृतिर्द्विविधा च सा ।
सत्त्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते ॥
मायां बिम्बो वशी कृत्य तां स्यात् सर्वज्ञ ईश्वरः ॥
अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा" इति ।

"अस्माद् मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः" "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्"-मित्येवमादिश्रुतय उक्ताभिप्राया द्रष्टव्याः ।

यद्वा यथा एक एव देवदत्तः क्रियानिमित्तवशेन पाचको याचक इति व्यपदिश्यते तथा एकमेवाऽज्ञानं विक्षेपाऽऽवरणशक्तिनिमित्तभेदेन माया ऽविद्येति च व्यपदिश्यते । तथा चाऽऽविद्याप्रतिबिम्बितं चैतन्यं जीवः । अविद्योपहितं बिम्बचैतन्यमीश्वरः । "आभास एव च" "अत एव चोपमा सूर्यकादिवत्" "यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन्, उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा" "एक एव हि भूतात्मा भूते भूते व्यवस्थितः । एकधा बहुधा चैव दृश्यते जलचन्द्रवत्" दित्यादिश्रुतिसूत्रयोः सत्त्वात् ॥ अस्मिन्पक्षे जीवस्त्वेक एव, तस्मिन्नन्तःकरणविशिष्टाः प्रमातारः कल्पिताः ।

केचित्तु नानाऽज्ञानं स्वीकृत्य वनवदज्ञानसमुदायः समष्टिस्तदुपहितं चैतन्यमीश्वरः। वृक्षवत्प्रत्येकमज्ञानं व्यष्टिस्तदुपहितचैतन्यं प्राज्ञ इति वदन्ति।

अन्ये तु कारणीभूताऽज्ञानोपहितं चैतन्यमीश्वरः, अन्तःकरणोपहितं चैतन्यं जीवः। "कार्योपाधिरयं जीवः कारणोपाधिरीश्वर" इति वचनादित्याहुः।

सर्वथा मायोपहितचैतन्यमीश्वरः। स च ज्ञानशक्त्युपहितस्वरूपेण जगत्कर्त्ता, विक्षेपादिशक्तिमदज्ञानोपहितस्वरूपेण जगदुपादानम्, ऊर्णनाभिवत्। "यथोर्णनाभिः सृजते गृह्णीते च" इत्यादिश्रुतेः। "यः सर्वज्ञः स सर्ववित् स सर्वस्य कर्त्ते"-त्यादिश्रुतिभ्यश्च।

एवं पूर्वोक्तादीश्वरादाकाश उत्पद्यते। "आकाशाद्वायुः, वायोरग्निरग्नेरापः, अद्भ्यः पृथिवी च" "तस्माद्वा एतस्मादात्मन आकाशः संभूत" इत्यादिश्रुतेः। मायायाः सत्त्वरजस्तमोगुणात्मकत्वात्तत्कार्याण्याकाशादीन्यपि सत्त्वरजस्तमोगुणात्मकान्यपञ्चीकृतानि सूक्ष्मभूतानि, इति च वर्णयन्ति।

एतेभ्यः सूक्ष्मभूतेभ्यः स्थूलभूतानि सूक्ष्मशरीराणि च सप्तदशलिङ्गात्मकानि जायन्ते।

सप्तदशलिङ्गानि तु ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि मनो बुद्धिः पञ्च प्राणाश्चेति।

तथा च आकाशादिसात्त्विकांशेभ्यो व्यस्तेभ्यो ज्ञानेन्द्रियाण्युत्पद्यन्ते। आकाशसात्त्विकांशाच्छ्रोत्रमुत्पद्यते। वायोः सात्त्विकांशात्त्वगिन्द्रियम्। तेजसः सात्त्विकांशाच्चक्षुः। अपां सात्त्विकांशाद्रसनम्। पृथ्वीसात्त्विकांशाद् घ्राणम्। "श्रोत्रमाकाश" इत्यादिश्रुतेः।

आकाशादीनां सात्त्विकांशेभ्यो मिलितेभ्यो ऽन्तःकरणमुत्पद्यते।

तत् संकल्पविकल्पनिश्चयाऽभिमानाऽनुसंधानरूपवृत्तिभेदाच्चतुर्विधम्।

"मनो बुद्धिरहंकारश्चित्तं चेति चतुर्विधम्।
संकल्पाख्यं मनोरूपं बुद्धिर्निश्चयरूपिणी॥
अभिमानात्मकस्तद्वदहंकारः प्रकीर्त्तितः।
अनुसंधानरूपं च चित्तमित्यभिधीयते"॥

इति वार्त्तिकवचनात्।

पूर्वोक्ताकाशादिरजोंशेभ्यो व्यस्तेभ्यः कर्मेन्द्रियाण्युत्पद्यन्ते। आकाशराजसांशात्त्वगिन्द्रियमुत्पद्यते। वायोः राजसांशाद्धस्तौ। तेजसो राजसांशात् पादौ। अपां राजसांशादुपस्थः। पृथिवीराजसांशात्पायुः।

आकाशादिराजसांशेभ्यो मिलितेभ्यः प्राण उत्पद्यते। सो ऽपि वृत्तिभेदात्पञ्चविधः। प्राग्गमनवान्नासाग्रस्थानवर्त्ती प्राणः। अवागगमनवान् पाय्वादिस्थानवर्त्ती अपानः। विष्वग्गमनवान् सर्वशरीरवर्त्ती व्यानः। ऊर्ध्वगमनवान् कण्ठवर्त्ती उदानः। अशितपीतान्नपानादिसमीकरणकरो ऽखिलशरीरवर्त्ती समानः। "वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाणि तेषां क्रमेण"-त्यादिश्रुतेः।

अन्नमय,प्राणमय,मनोमय,विज्ञानमया,ऽऽनन्दमयाः कोशाः पञ्चाऽत्रैवान्तर्भवन्ति। वक्ष्यमाणं स्थूलशरीरमन्नमयकोशः। उक्तं सूक्ष्मशरीरं कोशत्रयात्मकम्। कर्मेन्द्रियैः सहितः प्राणः प्राणमयकोशः। कर्मेन्द्रियैः सहितं मनो मनोमयकोशः। ज्ञानेन्द्रियैः सहिता बुद्धिर्विज्ञानमयकोशः।

अयमेव कर्तृत्वोपाधिः । "विज्ञानं यज्ञं तनुते कर्माणि तनुते ऽपि च" इत्यादिश्रुतेः ॥

अन्तःकरणस्य सत्त्ववृत्तिर्द्विविधा। निश्चयवृत्तिः, सुखाकारवृत्तिश्चेति । निश्चयवृत्तिमदन्तःकरणं बुद्धिरित्युच्यते । सुखाकारवृत्तिमदन्तःकरणं भोक्तृत्वोपाधिः । "तस्य प्रियमेव शिरो, मोदो दक्षिणः पक्षः, प्रमोद उत्तरः पक्षः, आनन्द आत्मा, ब्रह्मपुच्छं प्रतिष्ठा" इत्यादिश्रुतेः । अयमेव कारणपर्यन्त आनन्दमयकोशः ।

केचित्तु अज्ञानम् आनन्दमयकोशं वदन्ति ।

इदं सूक्ष्मशरीरं सप्तदशलिङ्गं द्विविधम्। समष्टिव्यष्टिभेदात्। अपञ्चीकृतपञ्चमहाभूततत्कार्यसप्तदशलिङ्गं समष्टिरित्युच्यते। एतदुपहितं चैतन्यं हिरण्यगर्भ इत्युच्यते, प्राणः सूत्रात्मेति च। ज्ञानक्रियाशक्तिमदुपहितत्वाद् व्यापित्वाच्च। अथ वा पूर्वोक्ताऽपञ्चीकृतभूतेभ्यः सर्वव्यापकं लिङ्गशरीरं पृथगेवोत्पन्नं, तदेव समष्टिरित्युच्यते ।

समष्टित्वं नाम जात्यादिवत्सर्वत्र व्यष्टिष्वनुस्यूतत्वम्। तदुक्तम्। "तेभ्यः समभवत्सूत्रं लिङ्गं सर्वात्मकं महत्" इति ।

केचित्तु वनवल्लिङ्गशरीरसमुदायः समष्टिरिति वदन्ति ।

प्रत्येकं लिङ्गशरीरं व्यष्टिरित्युच्यते ।

व्यष्टित्वं नाम व्यक्तिवद्व्यावृत्तत्वम् । एतदुपहितं चैतन्यं तैजस इत्युच्यते। तेजोमयान्तःकरणोपहितत्वात्। सामान्यविशेषयोरिव जातिव्यक्त्योरिव च समष्टिव्यष्ट्योस्तादात्म्याभ्युपगमात् तदुपहितयोस्तैजससूत्रात्मनोरपि तादात्म्यम् ।

एतदेव सूक्ष्मशरीरमविद्याकामकर्मसहितं पुर्य्यष्टकमित्युच्यते । ज्ञानेन्द्रियपञ्चकं, कर्मेन्द्रियपञ्चकम्, अन्तःकरणचतुष्टयम्,

प्राणादिपञ्चकम्, भूतसूक्ष्मपञ्चकम्, अविद्या, कामः, कर्म, चेत्ये-तान्यष्टौ ।

तत्र कार्याविद्या द्रष्टव्या । सा चतुर्विधा । अनित्ये नित्यत्वबुद्धिः, अशुचौ शुचित्वबुद्धिः, असुखे सुखबुद्धिः, अनात्मन्यात्मबुद्धिश्चेति । तदुक्तम् । "अनित्याऽशुचिदुःखाऽनात्मसु नित्यशुचिसुखात्मख्यातिरविद्ये"ति । अस्यार्थः—अनित्ये ब्रह्मलोकादिसंसारसुखादिफले नित्यत्वबुद्धिरेका अविद्या द्रष्टव्या । अशुचिषु स्वशरीरपुत्रभार्यादिशरीरेषु शुचित्वबुद्धिरपरा । दुःखेषु दुःखसाधनेषु च सुखतत्साधनबुद्धिरन्या । अनात्मनि देहेन्द्रियादावहमित्यात्मबुद्धिरितरा चेत्यविद्या चतुर्विधेति । कामो रागः ।

कर्म त्रिविधम् । सञ्चित,मागामि,प्रारब्धश्चेति । स्वकृतं फलमदत्वा ऽदृष्टरूपेण विद्यमानं साञ्चितं कर्म । यथा सन्ध्यावन्दनाऽग्निहोत्रादि । आगामि अस्मिन् शरीरे क्रियमाणं कर्म । वर्त्तमानशरीराऽऽरम्भकं प्रारब्धं कर्म ।

सञ्चिताऽऽगामिकर्मणोः फलभोगेन वा विरोधिकर्मान्तरेण वा ब्रह्मज्ञानेन वा विनाशः । प्रारब्धस्य तु भोगेनैव विनाशः । किं बहुना प्रारब्धव्यतिरिक्तानामविद्यादीनां पञ्चक्लेशानां तत्त्वज्ञानान्नाशः । तथा हि—अविद्याऽस्मितारागद्वेषाऽभिनिवेशाः पञ्च क्लेशाः । कार्यकारणरूपा द्विविधा ऽविद्या निरूपिता । अहंकारस्य सूक्ष्मावस्था ऽस्मिता । इदमेव महत्तत्त्वं सामान्याऽहंकार इति चोच्यते । राग उक्तः । द्वेषः क्रोधः । स्वीकृतस्य पुनस्त्यागाऽसहिष्णुत्वमभिनिवेशः । एतेषां पञ्चानां ब्रह्मसाक्षात्कारान्निवृत्तिः । "ज्ञात्वा देवं मुच्यते सर्वपाशै"रित्यादिश्रुतेः । पाशैः पञ्चक्लेशैरित्यर्थः । तिष्ठतु तावत्प्रासङ्गिकम् । एवं सूक्ष्मशरीरोत्पत्तिर्निरूपिता ।

पञ्चीकृतभूतानि स्थूलभूतानि ।

पञ्चीकरणं तु पूर्वोक्तानामाकाशादीनां तामसांशान् एकैकं द्विधा समं विभज्य तत्रैकं चतुर्धा विभज्य स्वांशं परित्यज्य इतरांशेषु योजनम् । तेषां पृथ्वी मलमांसमनः, जलं मूत्रलोहितप्राणाः, तेजो ऽस्थिमज्जावाक् "त्रिवृतं त्रिवृतमेकैकं करवाणी"ति त्रिवृत्करणश्रुतेः पञ्चीकरणस्याप्युपलक्षणत्वात् पञ्चीकरणं प्रामाणिकमेव । "वैशिष्ट्यात्तु तद्वादस्तद्वाद" इति न्यायेन स्वांशभूयस्त्वाविशेषव्यपदेशोपि संभवति । एवं च सति आकाशे शब्दो ऽभिव्यज्यते । वायौ शब्दस्पर्शौ । तेजसि शब्दस्पर्शरूपाणि । जले शब्दस्पर्शरूपरसाः । पृथिव्यां शब्दस्पर्शरूपरसगन्धाश्च । तथा पञ्चीकृतपृथिव्या ब्रह्माण्डमुत्पन्नं तदन्तर्वर्त्तिलोकाश्चतुर्दश । ब्रह्माण्डान्मनुशतरूपे जाते । ब्रह्माण्डान्तर्वर्त्तिपृथिव्या ओषध्य उत्पन्नाः । ओषधिभ्यो ऽन्नम् । पितृभ्यां भुक्तान्नपरिणामरेतःशोणितद्वारा स्थूलशरीरमुत्पन्नम् । तच्चतुर्विधम् । जरायुज, मण्डजं, स्वेदज, मुद्भिज्जं चेति । मनुष्यादिशरीरं जरायुजम् । पक्षिपन्नगादिशरीरमण्डजम् । यूकामशकादिशरीरं स्वेदजम् । तृणगुल्मादिशरीरमुद्भिज्जम् ।

उक्तं स्थूलशरीरं पुनः प्रकारान्तरेण द्विविधम् । समष्टिव्यष्टिभेदात् । पञ्चीकृतपञ्चमहाभूततत्कार्यं ब्रह्माण्डं तदन्तर्वर्त्तिकार्यं सर्वं समष्टिरित्युच्यते । अथ वा व्यक्तिषु गोत्वादिवत्सर्वव्यष्टिष्वनुस्यूतं पञ्चीकृतभूतकार्यं ब्रह्माण्डात्मकं व्यापकं समष्टिः, वनवत् । सकलस्थूलशरीरसमुदायो वा समष्टिरित्युच्यते । एतदुपहितं चैतन्यं विराट् वैश्वानर इत्युच्यते, विविधं राजमानत्वात् सर्वनराभिमानित्वाच्च । प्रत्येकं स्थूलशरीरं गवादिव्यक्तिवद्व्यावृत्तं व्यष्टिरित्युच्यते । एतदुपहितं चैतन्यं विश्व इत्युच्यते । सूक्ष्मशरीरमपरित्यज्य स्थूलशरीरप्रविष्टत्वात् । अनयोः समष्टिव्य-

च्योः सामान्यविशेषयोरिव तादात्म्याऽभ्युपगमात् एतदुपहित-विश्ववैश्वानरयोरपि तादात्म्यम् ।

एक एव जीवो जाग्रदवस्थायां स्थूलसूक्ष्मकारणाऽविद्याभिमानी सन् विश्व इत्युच्यते । स एव स्वप्नावस्थायां सूक्ष्मशरीरकारणाऽविद्याऽभिमानी सन् तैजस इत्युच्यते । स एव सुषुप्तौ कारणाऽविद्याभिमानी सन्प्राज्ञ इत्युच्यते । स एव शरीरत्रयाऽभिमानरहितः सन् शुद्धः परमात्मा भवति ।

तस्यैवाभिमानिनो जीवस्याऽवस्थाः पञ्च । जाग्रत्स्वप्नसुषुप्तिमूर्च्छामरणभेदात् । दिगाद्यधिष्ठातृदेवताऽनुगृहीतैरिन्द्रियैः शब्दादिविषयाऽनुभवाऽवस्था जाग्रदवस्था । जाग्रद्भोगप्रदकर्मोपरमे सति इन्द्रियोपरमे जाग्रदनुभवजन्यसंस्कारोद्भूतविषयतज्ज्ञानाऽवस्था स्वप्नावस्था । जाग्रत्स्वप्नोभयभोगप्रदकर्मोपरमे सति स्थूलसूक्ष्मशरीराभिमाननिवृत्तिद्वारा विशेषविज्ञानोपरमात्मिका बुद्धेः कारणात्मना ऽवस्थितिः सुषुप्तिः । मुद्गरप्रहारादिजनितविषादेन विशेषविज्ञानोपरमाऽवस्था मूर्च्छावस्था । तदुक्तम् । "मुग्धेऽर्द्धसंपत्तिः परिशेषा"दिति। एतच्छरीरभोगप्रापककर्मोपरमेण द्विविधदेहाभिमाननिवृत्त्या संपिण्डितकरणग्रामाऽवस्था भाविशरीरप्राप्तिपर्यन्तं मरणावस्था ।

केचित्तु अस्या उक्तावस्थास्वन्तर्भावं वदन्ति । अत्र श्रुतिस्मृतिपुराणानि प्रमाणानि प्रसिद्धानि ।

एक एव परमात्मा समष्टिस्थूलसूक्ष्मशरीरतत्कारणमायोपहितः सन् वैश्वानर इत्युच्यते । अहमेव वैश्वानरो ऽस्मीत्येतदुपासनया तत्प्राप्तिः फलं भवति।वैश्वानराधिकरणे सूत्रकारभाष्यकाराभ्यां श्रुत्यर्थस्य तथा प्रतिपादनात् । स एव परमात्मा समष्टिसूक्ष्मशरीरतत्कारणमायोपहितः सन् हिरण्यगर्भ इत्युच्य-

ते। एतदुपासनया तत्प्राप्तिः फलं भवति। "अन्तर उपपत्ते"रि-त्यस्मिन्नधिकरणे सूत्रकारभाष्यकाराभ्याम् उपकोशलविद्यायां तथैव प्रतिपादनात् । स एव केवलमायोपाधिकः सन्नीश्वर इत्युच्यते। तदुपासनया तत्प्राप्तिः फलं भवति। "सर्वत्र प्रसिद्धोपदेशा"दिति शाण्डिल्यविद्यायां "दहर उत्तरेभ्य" इति दहरविद्यायां च सूत्रकारभाष्यकाराभ्यां यथोक्तेश्वरोपासनया तत्प्राप्तेः प्रतिपादनात्। "तं यथा यथोपासते तत्तदेव भवती"ति श्रुतेश्च। भावनामान्द्ये तु तत्तारतम्येन सार्ष्टिसारूप्यसामीप्यसालोक्यानि भवन्ति। साम्नः "सायुज्यं सलोकतां जयती"त्यादिश्रुतेः। ये पुनः साधनचतुष्टयसम्पन्ना विचाराऽसमर्था मन्दप्रज्ञास्तेषां गुरुमुखाद् ब्रह्म निश्चित्य सर्वोपाधिविनिर्मुक्तं सच्चिदानन्दलक्षणं ब्रह्माहमस्मीति निर्गुणब्रह्मोपासनया ऽस्मिन्नेव शरीरे जीवनाऽवस्थायां मरणाऽवस्थायां वा ब्रह्मलोके वा उत्पन्नब्रह्मसाक्षात्कारेण तत्प्राप्तिः फलं भवति। श्रुतिन्यायसाम्यात्। "ओमित्येतेनैवाऽक्षरेण परं पुरुषमभिध्यायीत स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते" "ओमित्यात्मानं युञ्जीत" "ओमित्येवं ध्यायथात्मान"मित्यादिश्रुतिभ्यः। भगवताप्युक्तम्।

ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्।
यः प्रयाति त्यजन् देहं स याति परमां गतिम् ॥ इति।
अन्ये त्वेवमजानन्तः श्रुत्वा ऽन्येभ्य उपासते।
तेपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः ॥ इति च।

एवं तत्पदार्थस्य मायोपहितस्य ब्रह्मणस्तटस्थलक्षणं जगज्जन्मादिकारणत्वं निरूपितम्। अयमेव अध्यारोप इत्युच्यते।

अस्याऽपवाद इदानीमुच्यते। अपवादो नाम अधिष्ठाने भ्रान्त्या प्रतीतस्य तद्व्यतिरेकेणाऽभावनिश्चयः। यथा शुक्त्यादौ

भ्रान्त्या प्रतीतस्य रजतादेः शुक्तिव्यतिरेकेण नेदं रजतं किं तु शुक्तिरित्यभावनिश्चयः । अयमेव बाधो विलापनमित्युच्यते ।

स च बाधस्त्रिविधः । शास्त्रीयो यौक्तिकः प्रत्यक्षश्चेति । "अथात आदेशो नेति नेति" "नेह नानास्ति किं चन" इत्यादिशास्त्राद् ब्रह्मव्यतिरेकेण प्रपञ्चाऽभावनिश्चयः शास्त्रीयो बाधः । मृद्व्यतिरेकेण घटाऽभावनिश्चयवन्निखिलकारणीभूतब्रह्मव्यतिरेकेण प्रपञ्चाऽभावं निश्चित्य दृश्यमानस्य मिथ्यात्वनिश्चयेन ब्रह्मात्ममात्रनिश्चयो यौक्तिको बाधः । "अहं ब्रह्मास्मी"ति तत्त्वमस्यादिवाक्यजन्यसाक्षात्कारेणाऽज्ञानतत्कार्यनिवृत्तिः प्रत्यक्षबाधः ।

यौक्तिकबाधस्यायं क्रमः—स्थूलप्रपञ्चं सर्वमपि स्थूलभूतेषु विलाप्य तद्व्यतिरेकेण तन्नास्तीति निश्चित्य स्थूलभूतानि समष्टिव्यष्टिसूक्ष्मशरीरं च सूक्ष्मभूतेषु विलाप्य तत्रापि पृथिवीमप्सु विलाप्य अपस्तेजसि तेजो वायौ वायुमाकाशे आकाशमज्ञानेऽज्ञानं चिन्मात्रे विलापयेत् । तथा च स्मृतिः ।

जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते ।
ज्योतिष्यापः प्रलीयन्ते ज्योतिर्वायौ प्रलीयते ॥
वायुश्च लीयते व्योम्नि तच्चाऽव्यक्ते प्रलीयते ।
अव्यक्तं पुरुषे ब्रह्मन्निष्कले संप्रलीयते ॥ इति ।

उक्तञ्च ।

अकारं पुरुषं विश्वमुकारे प्रविलापयेत् ।
उकारं तैजसं सूक्ष्मं मकारे प्रविलापयेत् ।
मकारं कारणं प्राज्ञं चिदात्मनि विलापयेत् ॥ इति ।

आभ्यामध्यारोपाऽपवादाभ्यां तत्त्वंपदार्थशोधनमपि सिद्धं भवति । तथा हि—मायादिसमष्टिस्तदुपहितचैतन्यमेतदाधाराऽनुप-

हितमखण्डचैतन्यं च तप्तायःपिण्डवदेतत् त्रयमविविक्तम् एकत्वेनाऽवभासमानं तत्पदवाच्यार्थो भवति। विविक्तमखण्डं चैतन्यं तत्पदलक्ष्यार्थो भवति । अविद्यादिव्यष्टिरेतदुपाहितचैतन्यमेतदाधाराऽनुपहितं मस्रकूचैतन्यमेतत्त्रयं तप्तायःपिण्डवदविविक्तमेकत्वेनाऽवभासमानं त्वंपदवाच्यार्थो भवति। विविक्तं मस्रकूचैतन्यं त्वंपदलक्ष्यार्थो भवति। एतौ लक्ष्यार्थावुपादाय संबन्धत्रयेण सहितं तत्त्वमस्यादिवाक्यं लक्षणया ऽखण्डार्थबोधकं भवति ।

संबन्धत्रयं तु पदयोः सामानाधिकरण्यम् । सामानाधिकरण्यं नाम भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः । यथा सो ऽयं देवदत्त इत्यत्र तत्कालविशिष्टदेवदत्तवाचकशब्दस्यैतत्कालविशिष्टवाचकाऽयंशब्दस्य चैकस्मिन् देवदत्तपिण्डे वृत्तिः। सामानाधिकरण्यं पदार्थयोर्विशेषणविशेष्यभावः। यथा तत्रैव सशब्दाऽर्थतत्कालविशिष्टाऽयंशब्दाऽर्थैतत्कालविशिष्टयोरन्योन्यभेदव्यावर्त्तकतया विशेषणविशेष्यभावः। सो ऽयमयं स इति पदयोरर्थयोर्वा ऽविरुद्धदेवदत्तपिण्डेन वाक्यार्थेन सह लक्ष्यलक्षणभावः। यथा तत्रैव सशब्दाऽयंशब्दयोस्तदर्थयोर्वा ऽविरुद्धदेवदत्तपिण्डेन वाक्यार्थेन सह लक्ष्यलक्षणभावः। तथा तत्त्वमस्यादिवाक्ये तत्त्वंपदयोः परोक्षाऽपरोक्षत्वविशिष्टेश्वरवाचकयोरखण्डचैतन्ये तात्पर्येण वृत्तिः सामानाधिकरण्यम्। तथा तत्त्वंपदार्थयोरीश्वरजीवयोरन्योन्यभेदव्यावर्त्तकतया तत्त्वमसि, त्वं तदसीति विशेषणविशेष्यभावः। तथा तत्त्वंपदयोस्तदर्थयोर्वा वाक्यार्थेनाऽविरुद्धाऽखण्डचैतन्येन विरुद्धांशपरित्यागेन लक्ष्यलक्षणभावः। तदुक्तम्।

सामानाधिकरण्यं च विशेषणविशेष्यता।
लक्ष्यलक्षणभावश्च पदाऽर्थप्रत्यगात्मनाम्॥ इति।

अस्याऽर्थस्तूक्त एव । एतदभिप्रायेण वाक्यवृत्तावप्युक्तम् ।

तत्त्वमस्यादिवाक्यं च तादात्म्यप्रतिपादने ।
लक्ष्यौ तत्त्वंपदार्थौ द्वावुपादाय प्रवर्त्तते ॥ इति ।

तादात्म्यप्रतिपादने, ऽखण्डस्वरूपप्रतिपादने इत्यर्थः । संसर्गस्य वा विशिष्टस्य वा विशिष्टैक्यस्य वा प्रत्यक्षादिविरुद्धत्वेन तत्त्वमस्यादिवाक्यप्रतिपाद्यत्वाऽयोगात् ।

अखण्डत्वं नाम विजातीयसजातीयस्वगतभेदशून्यत्वम् । सर्वस्य प्रपञ्चस्य ब्रह्मव्यतिरिक्तस्य कल्पितत्वेन मिथ्यात्वाद् विजातीयशून्यता । जीवपरमात्मनोरत्यन्तैक्यात्सजातीयभेदशून्यता । एकरसत्वात्स्वगतभेदशून्यता ।

अथ वा त्रिविधपरिच्छेदशून्यत्वमखण्डत्वम् । विभुत्वादेशपरिच्छेदशून्यत्वम् । नित्यत्वात्कालपरिच्छेदशून्यत्वम् । सर्वात्मकत्वाद्वस्तुपरिच्छेदशून्यत्वम् । "वेदाऽहमेतमजरं पुराणं सर्वात्मकं सर्वगतं विभुत्वा"दित्यादिश्रुतेः ।

यद्वा अपर्यायाऽनेकशब्दप्रकाश्यत्वे सति अविशिष्टत्वमखण्डत्वम् । तदुक्तम् ।

अविशिष्टमपर्यायाऽनेकशब्दप्रकाशितम् ।
एकं वेदान्तनिष्णाता अखण्डं प्रतिपेदिरे ॥ इति ।

एवं तत्त्वमस्यादिवाक्यजन्याऽखण्डाऽपरोक्षज्ञानादज्ञाननिवृत्तिरानन्दाऽऽवाप्तिश्च । तदुक्तम् ।

प्रत्यग्बोधो य आभाति सो ऽद्वयाऽऽनन्दलक्षणः ।
अद्वयाऽऽनन्दरूपश्च प्रत्यग्बोधैकलक्षणः ॥
इत्थमन्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत् ।
अब्रह्मता त्वमर्थस्य व्यावर्त्तेत तदैव हि ।

तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु ।
पूर्णाऽऽनन्दैकरूपेण प्रत्यग्बोधो ऽवतिष्ठते ॥ इति ।

अन्योन्यतादात्म्यप्रतिपत्तिः, अहं ब्रह्मास्मीति ब्रह्मैवाऽहमस्मीत्यखण्डाऽऽकारवृत्तिः । तया वृत्त्या अज्ञाने निवृत्ते ऽब्रह्मत्वपरोक्षत्वादीनां निवृत्तत्वात्प्रत्यगात्मनो ऽखण्डाऽऽनन्दस्वरूपाऽवस्थितिर्भवतीति श्लोकार्थः ।

इति प्रथमः परिच्छेदः ॥

अथ द्वितीयः परिच्छेदः।

---:o:---

वृत्तिर्नाम विषयचैतन्याऽभिव्यञ्जको ऽन्तःकरणाऽज्ञानयोः परिणामविशेषः। अभिव्यञ्जकत्वं नामाऽपरोक्षव्यवहारजनकत्वम्, आवरणनिवर्त्तकत्वं वा। परिणामो नाम उपादानसमसत्ताकाऽन्यथाभावः, उपादानविषमसत्ताकाऽन्यथाभावो विवर्त्त इति भेदादनयोः परिणामविवर्त्तयोर्वृत्तिः। उपादानाऽन्तःकरणाऽज्ञानाऽपेक्षया परिणामः, चैतन्याऽपेक्षया विवर्त्त इति न सिद्धान्तविरोधः। "तन्मनो ऽकुरुत" इत्यादिश्रुत्या ऽन्तःकरणस्य कार्यद्रव्यत्वेन साऽवयवतया परिणामित्वोपपत्तिः।

सा च वृत्तिर्द्विविधा, प्रमाऽप्रमाभेदात्। अत्र बोधेद्धा वृत्तिर्वृत्तीद्धो बोधो वा प्रमा। सा च द्विविधा। ईश्वराश्रया जीवाश्रया चेति। तत्रेक्षणाऽपरपर्यायस्रष्टव्यविषयाकारमायावृत्तिः प्रतिबिम्बितचिदीश्वराश्रया। "तदैक्षत बहु स्यां प्रजायेये" त्यादिश्रुतेः। अनधिगताऽबाधितविषयाकाराऽन्तःकरणवृत्तिप्रतिबिम्बितचिज्जीवाश्रया तु द्वितीया। ब्रह्मात्मैक्यप्रमायास्तथात्वान्नाऽसंभवः। प्रपञ्चस्य संसारदशायामबाधितत्वात्तत्प्रमायां नाऽव्याप्तिः। शुक्तिरजतादेर्ज्ञातसत्ताकत्वेनाऽज्ञातसत्ताकत्वाऽभावान्नाऽतिव्याप्तिः। तत्करणं प्रमाणम्।

सा जीवाश्रया प्रमा द्विविधा, पारमार्थिकी व्यावहारिकी चेति। तत्र तत्त्वमस्यादिवाक्यजन्या प्रमा पारमार्थिकी। सा च निरूपिता, अग्रेपि निरूपयिष्यते।

प्रपञ्चप्रमा व्यावहारिकी। सा षड्विधा। प्रत्यक्षाऽनुमित्युपमितिशब्दाऽर्थापत्त्यभावप्रमाभेदात्। तत्र विषयचैतन्या-

ऽभिन्नं प्रमाणचैतन्यं प्रत्यक्षप्रमा । तथा हि—एकमेव चैतन्यमुपाधिभेदाच्चतुर्विधम् । प्रमातृचैतन्यं, प्रमाणचैतन्यं, विषयचैतन्यं, फलचैतन्यं चेति । तत्राऽन्तःकरणविशिष्टचैतन्यं प्रमातृचैतन्यम् । अन्तःकरणवृत्त्यवच्छिन्नचैतन्यं प्रमाणचैतन्यम् । घटाऽवच्छिन्नचैतन्यं विषयचैतन्यम् । अन्तःकरणाऽभिव्यक्तिचैतन्यं फलचैतन्यम् ।

तत्र वृत्तिविषययोर्युगपदेकदेशाऽवस्थाने तदुपहितचैतन्ययोरप्यभेदो भवति । तथा हि—तडागोदकं छिद्रान्निर्गत्य कुल्याद्वारा केदारं प्रविश्य चतुष्कोणाद्याकारेण यथा परिणमते तथेन्द्रियाऽर्थसन्निकर्षाऽनन्तरम् अन्तःकरणं चक्षुरादिद्वारा विषयदेशं गत्वा तेन संयुज्यते, पश्चात्तदाकारेण परिणमते । सोयं परिणामो वृत्तिः । तस्यां विषयचैतन्यं प्रतिफलति । तदा वृत्तिविषययोर्युगपदेकदेशस्थत्वेन तदुपहिततद्भेदाऽप्रयोजकत्वात् प्रमाणचैतन्यं विषयचैतन्याऽभिन्नं भवति । सेयं प्रत्यक्षप्रमा । तत्र वृत्त्यावरणं निवर्त्तते । चैतन्येनाऽज्ञानं प्रमया वा सावरणमज्ञानं निवर्त्तते । ततो विषयः स्फुरति साक्षिणा । अन्तःकरणोपहितचैतन्यं साक्षी ।

सेयं प्रत्यक्षप्रमा द्विविधा । बाह्यप्रमा ऽऽन्तरप्रमा चेति । तत्र बाह्यप्रमा शब्दस्पर्शरूपरसगन्धभेदात्पञ्चधा । तत्करणानि श्रोत्रादीनि ज्ञानेन्द्रियाणि पञ्च । आन्तरप्रमा द्विविधा । आत्मगोचरा सुखादिगोचरा चेति । आत्मगोचरा द्विविधा । विशिष्टात्मविषया शुद्धात्मविषया चेति । अहं जीव इत्यादि विशिष्टात्मविषया । अहं ब्रह्मास्मीति शुद्धात्मविषया । मयि सुखमित्यादि सुखादिविषया ।

अन्तरिन्द्रियं मन आन्तरप्रमाकरणमिति वाचस्पतिमिश्राः ।

आचार्यास्त्वेवं वर्णयन्ति—

इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः ।

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः॥

इति श्रुतिस्मृतिभ्यां मनस इन्द्रियेभ्यः पृथक्करणान्मनो नेन्द्रियं, वृत्तिं प्रत्युपादानत्वान्न करणं मनः। सुखादिसाक्षात्कारस्य प्रमाणाजन्यत्वेनाऽप्रमात्वमिष्टमेव। अत एवान्तःकरणतद्धर्माणां शुक्तिरजतादिवत्प्रातीतिकत्वम्। शुद्धात्मसाक्षात्कारस्य वेदान्तवाक्यजन्यत्वात्प्रमात्वम्। वाक्यस्यापरोक्षज्ञानजनकत्वं वक्ष्यते। इति प्रत्यक्षप्रमाणम्।

लिङ्गज्ञानजन्यज्ञानमनुमितिः। व्याप्त्याश्रयो लिङ्गम्। साधनसाध्ययोर्नियतसामानाधिकरण्यं व्याप्तिः। प्रतिबन्धकाऽभावे सति सहचारदर्शनेन सा गृह्यते। तस्यां गृहीतायां लिङ्गज्ञानेन व्याप्त्यनुभवजन्यसंस्कारोद्बोधे सत्यनुमितिर्जायते। इयं स्वार्थानुमितिः।

परार्थानुमितिस्तु न्यायसाध्या। न्यायो ऽवयवसमुदायः। अवयवास्त्रयः, प्रतिज्ञाहेतूदाहरणरूपाः। उदाहरणोपनयनिगमनरूपा वा। तथाहि—जीवः परस्मान्न भिद्यते सच्चिदानन्दलक्षणत्वात् परमात्मवदित्यत्र जीवः परस्मान्न भिद्यते इति प्रतिज्ञा। सच्चिदानन्दलक्षणत्वं हेतुः। इदमेव लिङ्गमित्युच्यते। यः सच्चिदानन्दलक्षणः स परस्मान्न भिद्यते यथा परमात्मेत्युदाहरणम्। अहमस्मीति भामीति कदाप्यप्रियो न भवामीत्यनुभवाज्जीवस्य सच्चिदानन्दलक्षणत्वम्। अतो न हेत्वसिद्धिः। "सत्यं ज्ञानमनन्तं ब्रह्म" "आनन्दो ब्रह्मेति व्यजाना"दित्यादिश्रुत्या ब्रह्मणः सच्चिदानन्दलक्षणत्वम्। अतो न दृष्टान्ताऽसिद्धिः। एवं गुरुमुखाच्छ्रुतवेदान्तस्य शोधितत्वंपदार्थस्य स्वस्मिन् सच्चिदानन्दलक्षणदर्शनादहं ब्रह्मेति ब्रह्माऽभिन्नानुमितिरुत्पद्यते।

न चौपनिषदस्य ब्रह्मैक्यस्याऽनुमानगम्यत्वाऽनुपपत्तिः।

मन्तव्य इति मननविधानात् । वेदान्तसहकारित्वेनाऽनुमानप्रामाण्यस्वीकारात् ।

परार्थानुमितिस्तु न्यायोपदेशेनोत्पद्यते । न्यायो दर्शितः । एवं ब्रह्मव्यतिरिक्तस्य मिथ्यात्वसाध्यानुमितिर्दृश्यत्वादिहेतुभिरुत्पद्यते ।

मिथ्यात्वं नामाऽनिर्वचनीयत्वम् । दृश्यत्वं नाम चैतन्यविषयत्वम् । अतो ब्रह्मणि न व्यभिचारः ।

तच्चाऽनुमानमन्वयिरूपमेकमेव, न तु केवलान्वयि । अस्मन्मते ब्रह्मव्यतिरिक्तस्य सर्वस्य प्रपञ्चस्य ब्रह्मनिष्ठाऽत्यन्ताभावप्रतियोगित्वेन तदप्रतियोगित्वरूपकेवलान्वयित्वस्याऽप्रसिद्धेः । नापि व्यतिरेकि । साधनेन साध्याऽनुमितौ साध्याऽभावसाधनाऽभावव्याप्तिज्ञानस्याऽनुपयोगात् । अन्वयव्याप्तिमविदुषः साध्यप्रमा ऽर्थापत्तिप्रमाणादिति वक्ष्यते । इत्यनुमानम् ।

सादृश्यप्रमितिरुपमितिः ।

वाक्यकरणिका प्रमा शाब्दी । अकाङ्क्षायोग्यतासन्निधिमत्पदसमुदायो वाक्यम् । अन्वयानुपपत्तिराकाङ्क्षा । वाक्यार्थाऽबाधो योग्यता । अविलम्बेनोच्चारणं सन्निधिः । अव्युत्पन्नस्य संगतिग्रहाऽभावान्न वाक्यार्थप्रमा ।

पदपदार्थयोः स्मार्यस्मारकभावः संगतिः । सा द्विधा, शक्तिर्लक्षणा चेति । शक्तिर्नाम मुख्या वृत्तिः । पदपदार्थयोर्वाच्यवाचकभावः संबन्ध इति यावत् । सा च द्विविधा, योगो रूढिश्चेति । अवयवशक्तिर्योगः । यथा पाचकादिपदानाम् । रूढिः समुदायशक्तिः । यथा घटादिपदानाम् । सा च व्यवहारादिना गृह्यते । तथाहि—उत्तमवृद्धस्य घटमानयेति वाक्यश्रवणानन्तरं मध्यमवृद्धः प्रवर्त्तते, बालः प्रवृत्तिं दृष्ट्वा ज्ञानमनुमिनोति ।

तथा हि—इयं प्रवृत्तिर्ज्ञानसाध्या प्रवृत्तित्वान्मदीयप्रवृत्तिवत् इति ज्ञानमनुमाय तस्य वाक्यजन्यत्वमनुमिनोति । इदं ज्ञानमेतद्वाक्यजन्यम् एतद्वाक्याऽन्वयव्यतिरेकाऽनुविधायित्वाद्दण्डजन्यघटादिवत् इति । अनन्तरमावापोद्वापाभ्यां घटपदस्य घटव्यक्तौ शक्तिमवधारयति ।

सा च शक्तिः पदार्थे इति नैयायिकाः । कार्यान्विते इति मीमांसकाः । अन्विते इति वेदान्तिनः ।

एवं व्याकरणादिनापि शक्तिर्गृह्यते । उक्तं च—

शक्तिग्रहं व्याकरणोपमान-
कोशाऽऽप्तवाक्याद् व्यवहारतश्च ।
वाक्यस्य शेषाद्विवृतेर्वदन्ति
सान्निध्यतः सिद्धपदस्य वृद्धाः ॥

लक्षणा शक्यसम्बन्धः । सा च द्विविधा, केवललक्षणा लक्षितलक्षणा चेति । केवला त्रिविधा । जहल्लक्षणा अजहल्लक्षणा जहदजहल्लक्षणा चेति । शक्याऽपरित्यागेन तत्सम्बन्ध्यर्थान्तरे वृत्तिर्जहल्लक्षणा । यथा गङ्गायां घोषः प्रतिवसतीति । अत्र गङ्गापदस्य तीरे शक्यार्थाऽपरित्यागेन तत्संबन्ध्यर्थान्तरे वृत्तिरजहल्लक्षणा । यथा मञ्चाः क्रोशन्तीति । अत्र मञ्चपदस्य मञ्चस्थेषु पुरुषेषु शक्यैकदेशपरित्यागेन एकदेशेन वृत्तिर्जहल्लक्षणा । इयमेव भागलक्षणेत्युच्यते । यथा सोयं देवदत्त इत्यत्र सोऽयमिति पदयोः केवलदेवदत्तपिण्डे । यथा वा तत्त्वमसीत्यत्र तत्त्वंपदयोरखण्डचैतन्ये । शक्यपरम्परासंबन्धो लक्षितलक्षणा । यथा द्विरेफपदस्य मधुकरे । गौण्यपि लक्षितलक्षणैव ।

एवं व्युत्पन्नस्य गृहीतसंगतिकवाक्याद्वाक्यार्थप्रमोत्पत्तौ

आकाङ्क्षा योग्यता आसत्तिस्तात्पर्यज्ञानं चेति चत्वारि कारणानि । आकाङ्क्षायोग्यते निरूपिते ।

शक्तिलक्षणाऽन्यतरसम्बन्धेनाऽव्यवधानेन पदजन्यपदार्थोपस्थितिरासत्तिः । तात्पर्यं द्विविधम् । वक्तृतात्पर्यं शब्दतात्पर्यं चेति । पुरुषाऽभिप्रायो वक्तृतात्पर्यम् । तज्ज्ञानं वाक्यार्थज्ञाने न कारणम् । तदभावे ऽपि अव्युत्पन्नस्य वाक्यार्थज्ञानदर्शनात् ।

तदितरप्रतीतिमात्रेच्छया ऽनुच्चरितत्वे सति तदर्थप्रतीतिजननयोग्यत्वं शब्दतात्पर्यम् । तच्च षड्विधैर्लिङ्गैर्निश्चीयते । वेदे लिङ्गानि तु दर्शितानि ।

उपक्रमोपसंहारावभ्यासो ऽपूर्वता फलम् ।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥ इति ।

अस्यार्थः—प्रकरणप्रतिपाद्यस्याऽद्वितीयवस्तुन आद्यन्तयोः प्रतिपादनमुपक्रमोपसंहारौ। तथा छान्दोग्ये ऽपि षष्ठे "सदेव सौम्येदमग्र आसी,देकमेवाद्वितीयं ब्रह्म, ऐतदात्म्यमिदं सर्व"मित्युपक्रमोपसंहारावाद्यन्तयोः ।

प्रकरणप्रतिपाद्यस्य पुनः पुनः प्रतिपादनमभ्यासः । यथा तत्रैव तत्त्वमसीति नवकृत्वो ऽभ्यासः ।

प्रकरणप्रतिपाद्यस्य मानान्तराविषयता ऽपूर्वता । यथा तत्रैव द्वितीयवस्तुनो मानान्तराऽविषयता ।

प्रकरणप्रतिपाद्यस्य श्रूयमाणं तज्ज्ञानात्तत्प्राप्तिः प्रयोजनं फलम्। यथा तत्रैवा"ऽऽचार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्ये ऽथ संपत्स्ये" इत्यद्वितीयवस्तुज्ञानात्तत्प्राप्तिः फलम् ।

प्रकरणप्रतिपाद्यस्य प्रशंसनमर्थवादः। यथा तत्रैव "येनाऽश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञात"मित्यद्वितीयवस्तुप्रशंसनम् ।

प्रकरणप्रतिपाद्यस्य दृष्टान्तैः प्रतिपादनमुपपत्तिः। यथा तत्रैव "यथा सौम्येकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचाऽऽरम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्य" मित्यादिवाक्यप्रतिपादितमृदादिदृष्टान्तैरद्वितीयवस्तुप्रतिपादनम्।

एवं षड्विधतात्पर्यलिङ्गैर्वेदान्तानाम् अद्वितीये ब्रह्मणि तात्पर्यनिश्चयः। इदमेव श्रवणमित्युच्यते।

श्रुतस्याऽर्थस्योपपत्तिभिश्चिन्तनं मननम्।

विजातीयप्रत्ययतिरस्कारेण सजातीयप्रत्ययप्रवाहीकरणं निदिध्यासनम्। तदुक्तम्—

शब्दशक्तिविषयं निरूपणं
युक्तितः श्रवणमुच्यते बुधैः।
वस्तुतत्त्वविषयं निरूपणं
युक्तितो मननमित्युदीर्यते॥
चेतसस्तु चितिमात्रशेषता
ध्यानमित्यभिवदन्ति वैदिकाः।
अन्तरङ्गमिदमित्युदीरितं
तत्कुरुष्व परमात्मबुद्धये॥ इति।

इदं श्रवणादित्रयं साधनसंपन्नस्य संन्यासिनो ज्ञानं प्रत्यन्तरङ्गसाधनम्। "आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य" इत्यादिश्रुतेः।

साधनानि नित्याऽनित्यवस्तुविवेक इहाऽमुत्राऽर्थफलभोगविरागः, शमदमादिसंपन्मुमुक्षुत्वं चेत्येवंरूपाणि। "परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन, तद्विज्ञानार्थं स गुरुमेवाऽभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं, कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्, शान्तो दान्त उपरत-

स्तितिक्षुः समाहितो भूत्वा ऽऽत्मन्येवाऽऽत्मानं पश्ये" दित्यादिश्रुतिभ्यो यथोक्तसाधनसंपन्नस्य संन्यासाऽधिकारः ।

विहितानां कर्मणां विधिना परित्यागः संन्यासः । स च वैराग्यहेतुकः । "यदहरेव विरजेत्तदहरेव प्रव्रजे" दित्यादिश्रुतेः । "वैराग्यं परमेतस्य मोक्षस्य परमो ऽवधिरिति श्रुतेश्च । स वैराग्यतारतम्येन चतुर्विधः, कुटीचकबहूदकहंसपरमहंसभेदात् ।

वैराग्यं द्विविधम्, अपरं परं चेति । तत्राऽपरं चतुर्विधम् । यतमानव्यतिरेकैकेन्द्रियत्ववशीकारभेदात् ।

अस्मिन् संसारे इदं सारमिदमसारमिति साराऽसारविवेको यतमानवैराग्यम् ।

चित्तगतदोषाणां मध्ये एतावन्तः पक्वा एतावन्तो ऽपक्वा इति विविच्याऽपक्वदोषनिरोधयत्नो व्यतिरेकवैराग्यम् ।

विषयेच्छासत्त्वे ऽपि मनसीन्द्रियनिरोधाऽवस्थानमेकेन्द्रियत्वं वैराग्यम् ।

वशीकारवैराग्यमैहिकाऽऽमुष्मिकविषयजिहासा । तदुक्तम्— "दृष्टाऽऽनुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्य" मिति । तच्च त्रिविधम्, मन्दं तीव्रं तीव्रतरं चेति ।

पुत्रदारादिवियोगे धिक् संसारमिति बुद्ध्या विषयजिहासा मन्दवैराग्यम् ।

अस्मिन् जन्मनि पुत्रदारादि माऽस्त्विति स्थिरबुद्ध्या विषयजिहासा तीव्रम् ।

पुनरावृत्तिसहितब्रह्मलोकादिपर्यन्तं माऽस्त्विति स्थिरबुद्ध्या विषयजिहासा तीव्रतरम् । तत्र मन्दवैराग्ये संन्यासाऽधिकार एव नास्ति ।

यदा मनसि वैराग्यं जायते सर्ववस्तुषु ।

तदैव संन्यसेद्विद्वानन्यथा पतितो भवेत्॥ इति स्मरणात्।

तीव्रवैराग्ये सति यात्राद्यशक्तौ कुटीचकाधिकारः। तच्छक्तौ बहूदकसंन्यासाधिकारः। तीव्रतरवैराग्ये सति हंससंन्यासाधिकारः। एते संन्यासास्त्रयः। एतेषामाचाराः स्मृतौ प्रसिद्धाः। तीव्रतरवैराग्ये मुमुक्षोः परमहंससंन्यासाधिकारः।

स च परमहंसो द्विविधः। विविदिषासंन्यासो विद्वत्संन्यासश्चेति।

साधनसंपन्नेन तत्त्वमुद्दिश्य क्रियमाणः संन्यासो विविदिषासंन्यासः। "एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ती"त्यादिश्रुतिस्तत्र प्रमाणम्।

स च द्विविधः। जन्मापादककर्मत्यागात्मकः, प्रैषोच्चारणपूर्वकदण्डधारणाद्याश्रमरूपश्चेति। "न कर्मणा न प्रजया धनेन त्यागेनैकेनामृतत्वमानशुरि"त्यादिश्रुतिराद्ये मानम्।

विरक्तस्य गृहस्थादेः प्रयत्ननिमित्तवशेन संन्यासप्रतिबन्धे आद्यसंन्यासेऽधिकारः। अत्र स्त्रीणामप्यधिकारः। जनकादीनां मैत्रेयीप्रभृतीनां तत्त्वविदां श्रुतिस्मृतीतिहासपुराणेषूपलम्भात्।

द्वितीये दण्डमाच्छदनं कौपीनं परिगृहेच्छेषं विसृजेत्।
संसारमेव निःसारं दृष्ट्वा सारदिदृक्षया।
प्रव्रजन्त्यकृतोद्वाहाः परं वैराग्यमाश्रिताः॥
इत्यादिवचनानि प्रमाणानि।

गृहस्थाश्रमादौ कृतश्रवणादिभिरुत्पन्नब्रह्मसाक्षात्कारेण गृहस्थादिना विक्षिप्तचित्तस्य चित्तविश्रान्तिलक्षणजीवन्मुक्तिमुद्दिश्य क्रियमाणः संन्यासो विद्वत्संन्यासः। तत्र "एतमेव विदित्वा मुनिर्भवति अथ योगिनां परमहंसाना"मित्यादिपरमहंसोपनिषत्,

यदा तु विदितं तत्त्वं परं ब्रह्म सनातनम् ।
तदैकदण्डं संगृह्य सोपवीतां शिखां त्यजेत् ।

इत्यादिश्रुतिस्मृतिवचनानि प्रमाणानि । तत्राद्यसंन्यासो जन्मान्तरीयो ऽपि ज्ञाने उपकरोति। जनकादीनां तत्त्वज्ञानोपालम्भाच्छुत्यादिषु "यद्यातुरः स्यान्मनसा वाचा वा संन्यसे"दित्यातुरसंन्यासविधानाच्च। आतुरेऽपि विरक्तस्यैवाधिकारान्न संन्यासान्तरम् । अन्यथा प्रकरणविरोधप्रसङ्गात् । तदुक्तम् ।

जन्मान्तरेषु यदि साधनजातमासीत्
संन्यासपूर्वकमिदं श्रवणादिकं च ।
विद्यामवाप्स्यति जनः सकलो ऽपि यत्र
तत्राश्रमादिषु वसन्न निवारयामः ॥ इति ।

तदेवं पूर्वोक्ताधिकारिणः श्रवणादीनां तत्त्वज्ञानकारणत्वमन्वयव्यतिरेकाभ्यां निश्चीयते ।

आर्हार्थे श्रोतव्य इत्यादितव्यप्रत्यय इति वाचस्पतिमिश्राः ।

आचार्यास्त्वेवं वर्णयन्ति—यथोक्ताधिकारिणो द्रष्टव्यः श्रोतव्य इत्यादिवाक्यैर्दर्शनमुद्दिश्य मननिदिध्यासनाभ्यां फलोपकार्यङ्गाभ्यां श्रवणं नामाऽङ्गि विधीयते। तस्य च दृष्टफलत्वान्नापूर्वविधिः । अप्राप्तविधायको ह्यपूर्वविधिः । किं तु नियमविधिर्वा परिसंख्याविधिर्वा ।

पक्षप्राप्तस्याऽप्राप्तांशपूरको विधिर्नियमविधिः । यथा "व्रीहीनवहन्या"दित्यवघातविधिः ।

उभयप्राप्तावितरव्यावृत्तिबोधको विधिः परिसंख्याविधिः । यथा "इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते" इति गर्दभरशनाग्रहणव्यावृत्तिविधिः।एवं प्रकृते जिज्ञासुर्वेदान्तश्रवणमेव कुर्या-

दिति नियमविधिः। वेदान्तश्रवणव्यतिरिक्तं न कुर्यादिति परिसंख्याविधिर्वा। तदुक्तम्।

नियमः परिसंख्या वा विध्यर्थो हि भवेद्यतः।
अनात्माऽदर्शनेनैव पराऽऽत्मानमुपास्महे॥ इति।

तच्च श्रवणं संन्यासिनां नित्यम्।
नित्यं कर्म परित्यज्य वेदान्तश्रवणं विना।
वर्त्तमानस्तु संन्यासी पतत्येव न संशयः॥

इति अकरणे प्रत्यवायश्रवणात्। "आ सुप्तेरा मृतेः कालं नयेद्वेदान्तचिन्तये"ति स्मृत्या "यावज्जीवमग्निहोत्रं जुहुया"दित्यादिश्रुत्या जीवनं निमित्तीकृत्याऽग्निहोत्रादिविधानवज्जीवनं निमित्तीकृत्य श्रवणादिविधानात्।

त्वंपदार्थविवेकाय संन्यासः सर्वकर्मणाम्।
श्रुत्या ऽभिधीयते यस्मात्तत्त्यागी पतितो भवेत्॥
कारकस्य करणेन तत्क्षणाद्
भिक्षुरेव पतितो यथा भवेत्।
व्यञ्जकस्य परिवर्जनादसौ
सद्य एव पतितो न संशयः॥

इति वार्त्तिकाचार्यसंक्षेपशारीरकाचार्याभ्यां श्रवणादिरहितस्य संन्यासिनः पातित्याऽभिधानाच्च।

गृहस्थादीनां श्रवणादि काम्यम्।
दिने दिने तु वेदान्तश्रवणाद्भक्तिसंयुतात्।
गुरुशुश्रूषया लब्धात्कृच्छ्राऽशीतिफलं लभेत्॥

अन्ये तु वेदान्तश्रवणे साधनचतुष्टयसंपन्नस्यैवाऽधिकाराद् गृहस्थादेः श्रवणाऽधिकार एव नास्ति, श्रुतिषु याज्ञवल्क्यजनकादीनां तत्त्वज्ञानप्रतिपादकोपाख्यानस्य ब्रह्मात्मनि तात्पर्यात्

स्वार्थे तात्पर्यमेव नास्तीत्याहुः । तदसत् । याज्ञवल्क्यप्रभृतीनां गृहस्थस्य तुलाधारस्य च ज्ञानित्वश्रवणात् ।

परं वैराग्यं गुणवैतृष्ण्यम् । गुणेषु जिहासेति यावत् । तदुक्तं "तत् परं पुरुषख्यातेर्गुणवैतृष्ण्य"मिति । तच्चाऽसंप्रज्ञातसमाधेरन्तरङ्गसाधनम् । उक्तं च "तीव्रसंवेगानामासन्नः समाधिलाभ" इति । अलमतिप्रसङ्गेन ।

एवं कर्मवाक्यानामप्युपक्रमादिभिस्तात्पर्यनिर्णयः । प्रकरणादिना लौकिकवाक्यानां तात्पर्यनिर्णयः । एतादृशतात्पर्याऽनुपपत्तिः पूर्वोक्तलक्षणाबीजं, न त्वन्वयाऽनुपपत्तिः । तस्या यष्टीः प्रवेशयेत्यादावसंभवात् । गङ्गायां घोष इत्यादौ तात्पर्याऽनुपपत्तेः संभवात् । न केवलं लक्षणा पदमात्रवृत्तिः, किं तु वाक्यवृत्तिरपि । गभीरायां नद्यां घोष इत्यादौ पदसमुदायात्मकवाक्यस्य तीरे लक्षणास्वीकारात् । अत एवाऽर्थवादवाक्यानां प्राशस्त्ये लक्षणा । अन्यथा पदान्तरवैयर्थ्यं स्यात् । अत एव प्राशस्त्यपदार्थप्रत्यायकत्वेनाऽर्थवादवाक्यानां पदस्थानीयतया पदैकवाक्यत्वम् । स्वार्थे तात्पर्यवतां "समिधो यजति" "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते"त्यादिवाक्यानामुपकारकाऽऽकाङ्क्षायाम् एकवाक्यत्वं वाक्यैकवाक्यत्वम् । एवं चाऽवान्तरवाक्यार्थज्ञानमपि महावाक्यार्थज्ञाने कारणम् । तथा ऽन्वयव्यतिरेकाऽनुविधानात् ।

एवं यथोक्तसहिकारिसंपन्नं वाक्यं परोक्षाऽपरोक्षभेदेन द्विविधां प्रमामुत्पादयति ।

तत्र परोक्षार्थप्रतिपादकं वाक्यं परोक्षप्रमोत्पादकम् । यथा "स्वर्गकामो यजेत" "सदेव सोम्येदमग्र आसीत्" "दशमोस्ती"त्यादिवाक्यम् । परोक्षत्वं नामाऽनावृतसंवित्तादात्म्याभावो योग्यस्य विषयस्य । धर्माऽधर्मयोरयोग्यत्वान्न प्रत्यक्षत्वम् ।

अपरोक्षार्थप्रतिपादकं वाक्यमपरोक्षप्रमोत्पादकम्। यथा दशमस्त्वमसि तत्त्वमसीत्यादिवाक्यम्। अपरोक्षत्वं नामाऽनावृतसंवित्तादात्म्यम्। अनावृतसंवित्साक्षिचैतन्यम्। अन्तःकरणोपहितं चैतन्यं साक्षी। तस्यावृतत्वे जगदान्ध्यप्रसङ्गः। तत्तादात्म्यं नाम तद्भिन्नत्वे सति तदभिन्नसत्ताकत्वम्। तथा च दशमस्त्वमसीत्यत्र दशमस्य त्वम्पदार्थाऽभिन्नतया ऽपरोक्षत्वेन वाक्याद्दशमाऽपरोक्षप्रमैव जायते दशमोस्मीति, न तु वाक्यात्परोक्षज्ञानं मनसा तत्साक्षात्कारः। मनसो ऽनिन्द्रियत्वस्योक्तत्वात्, वृत्ति प्रत्युपादनत्वेन करणत्वाऽयोगाच्च, प्रमाणजन्याऽपरोक्षज्ञानस्यैव भ्रमनिवर्त्तकत्वाच्च। एवं तत्त्वमसि इत्यत्रापि तत्पदलक्ष्यस्य ब्रह्मणस्त्वंपदलक्ष्यसाक्ष्यभिन्नतया ऽनावृतसंवित्तादात्म्यान्नित्याऽपरोक्षत्वेन शोधितत्वंपदार्थस्याऽधिकारिणो मननिदिध्यासनसंस्कृतान्तःकरणसहकृतविचारिततत्त्वमस्यादिवाक्यादहं ब्रह्मास्मीत्यपरोक्षप्रमा जायते। एवं च सति "सर्वे वेदा यत्पदमामनन्ति" "तं त्वौपनिषदं पुरुषं पृच्छामि" नाऽवेदविन्मनुते तं बृहन्त"मित्यादिश्रुतयः सामञ्जस्येनोपपद्यन्ते। "मनसैवानुद्रष्टव्य"मित्यादिश्रुतिस्तु मनसो वाक्यसहकारित्वप्रतिपादनपरा। अन्यथा "यन्मनसा न मनुते" इत्यादिश्रुतिविरोधप्रसङ्गात्। एवं शाब्दी प्रमा निरूपिता।

अनुपपद्यमानार्थदर्शनात् तदुपपादकभूताऽर्थान्तरकल्पनमर्थापत्तिप्रमा। यथा दिवा ऽभुञ्जानस्य देवदत्तस्य रात्रिभोजनं विना ऽनुपपद्यमानपीनत्वज्ञानात्तदुपपादकरात्रिभोजनकल्पनम्। तत्राऽनुपपद्यमानपीनत्वज्ञानं करणम्। रात्रिभोजनकल्पनं फलम्।

सा चाऽर्थापत्तिर्द्विविधा, दृष्टाऽर्थापत्तिः श्रुताऽर्थापत्तिश्चेति। दृष्टाऽर्थापत्तिर्यथा शुक्ताविदं रजतमित्यनुभूयमानस्य नेदं रजत-

मितिबाध्यत्वं दृष्टं, तस्य मिथ्यात्वमन्तरेण सत्यत्वे ऽनुपपन्नं सन्मिथ्यात्वं कल्पयति। न चेदं रजतमितिज्ञानद्वयम्। पुरोवर्त्तिनि प्रवृत्त्यभावप्रसङ्गात्। रजतस्याऽसत्त्वे तज्ज्ञानस्य प्रत्यक्षाऽभावप्रसङ्गात्। सत्त्वे बाधाऽभावप्रसङ्गात्। देशान्तरसत्त्वे रजतेन्द्रियसन्निकर्षाऽभावेन प्रत्यक्षाऽभावप्रसङ्गात्। रजतं साक्षात्करोमीत्यनुभवस्य सर्वाऽनुभवसिद्धत्वात्। तस्माद्भ्रमकाले शुक्तिकाशकले रजतमुत्पद्यतइत्यङ्गीकर्त्तव्यम्। रजतोत्पादकलौकिकसामग्र्यभावे ऽपि पुरोवर्तीन्द्रियसन्निकर्षानन्तरमिदमाकारवृत्तौ सत्यामिदमवच्छिन्नचैतन्यनिष्ठा शुक्तित्वप्रकारिका ऽविद्या सादृश्यदर्शनसमुद्बुद्धसंस्कारसहकृता रजताकारेण तज्ज्ञानाकारेण च परिणमते। तस्य च मायाकार्यत्वात् मिथ्यात्वम्। एवं दृष्टाऽर्थापत्तिर्निरूपिता।

श्रुताऽर्थापत्तिर्यथा "तरति शोकमात्मवि"दिति शोकोपलक्षितप्रमातृत्वादिबन्धस्य ज्ञाननिवर्त्यत्वं श्रुतं, तस्य मिथ्यात्वमन्तरेण सत्यत्वे ऽनुपपन्नं सन्मिथ्यात्वं कल्पयति। सेयं श्रुतार्थापत्तिः।

अन्तःकरणविशिष्टं चैतन्यं प्रमाता कर्त्ता भोक्ता च। केवलस्यात्मनो ऽसङ्गत्वेन प्रमातृत्वाद्यनुपपत्तेः शुक्तिरजतवदात्माज्ञानादन्तःकरणादिकं स्वरूपेण प्रत्यगात्मन्यध्यस्तम्।

अध्यासो नाम परत्र पराऽवभासः।

स च द्विविधः। ज्ञानाऽध्यासो ऽर्थाऽध्यासश्चेति। तत्राऽतस्मिंस्तद्बुद्धिर्ज्ञानाऽध्यासः। यथा शुक्तौ रजतबुद्धिः, यथा वाऽऽत्मन्यनात्मबुद्धिः।

प्रमाणजन्यज्ञानविषयः पूर्वदृष्टसजातीयो ऽर्थाऽध्यासः। सोपि द्विविधः। प्रातीतिको व्यावहारिकश्चेति। तत्राऽऽगन्तुकदोषजन्यः प्रातीतिकः। यथा शुक्तिरजतादिः। प्रातीतिकभिन्नो व्यावहा-

रिकः। यथाऽऽकाशादि घटान्तं जगत् । तथा च प्रमातृत्वादिबन्धस्याऽध्यस्ततया मिथ्यात्वमुपपद्यते ।

एतदभिप्रायेणोक्तम् भगवता भाष्यकारेण "स्मृतिरूपः परत्र पूर्वदृष्टाऽवभासः सजातीयाऽवभास" इति। अस्यार्थः—स्मृतिरूपः संस्कारजन्यत्वेन स्मृतिसदृशः पूर्वदृष्टाऽवभासः पूर्वदृष्टसजातीय इति। एवं श्रुताऽर्थापत्तिर्निरूपिता।

अभावप्रमा योग्याऽनुपलब्धिकरणिका। यथा घटाऽनुपलब्ध्या घटाऽभावप्रमा भूतले जायते, तत्राऽनुपलब्धिरेव करणं, नेन्द्रियं, तस्याऽधिकरणग्रहेणोपक्षीणत्वात्, अभावेन समं संनिकर्षाऽभावाच्च।

असाधारणं कारणं करणम्।

नियतपूर्ववृत्ति कारणम्। तद् द्विविधम्, उपादानकारणं निमित्तकारणं चेति। कार्याऽन्वितं कारणमुपादानं, यथा घटादेर्मृदादिः। कार्याऽनुकूलव्यापारवन्निमित्तम् । यथा घटादेः कुलालादि। ब्रह्म तु मायोपहितं सत्प्रपञ्चस्योपाधिप्राधान्येनोपादानं, स्वप्राधान्येन निमित्तम्। "तदैक्षत बहु स्यां प्रजायेये"-त्यादिश्रुतेः। "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधा"दिति सूत्राच्च।

तच्च कारणं द्विविधम्। साधारणमसाधरणं चेति। कार्यमात्रोत्पादकं साधारणं कारणं, यथाऽदृष्टादि। कार्यविशेषोत्पादकमसाधारणकारणम्। यथा चाक्षुषादिप्रमायां चक्षुरादि। तथा च घटाद्यभावप्रमायां घटाद्यनुपलब्धिरसाधारणं कारणम्। तदेव करणम्।

यद्यत्र घटः स्यादिति तर्कितेन प्रतियोगिसत्त्वेन तर्ह्युपलभ्येतेति प्रसञ्जित उपलब्धिरूपः प्रतियोगी यस्याः सा योग्याऽनुपलब्धिः। तया अभावो गृह्यते।

नञर्थोल्लिखितधीविषयो ऽभावः । सो ऽत्यन्ताऽभाव एक एव, भेदे प्रमाणाऽभावात् । तथा हि–"सदेव सौम्येदमग्र आसीत्" "सत्त्वाच्चावरस्ये"ति श्रुतिसूत्राभ्यां प्रागुत्पत्तेः कार्यस्य कारणात्मना सत्त्वप्रतिपादनेन प्रागभावस्य दुर्निरूपत्वात् । प्रागात्मज्ञानात्कार्यस्य निरन्वयनाशाऽनङ्गीकारेण ध्वंसस्यापि दुर्निरूपत्वात् । अनादिनित्यत्रैकालिकाऽत्यन्ताभावाऽन्योन्याभावसत्त्वे ऽद्वैतश्रुतिविरोधापत्तेः । अतो ऽत्यन्ताभाव एक एव ।

स च द्विविधः, पारमार्थिको व्यावहारिकश्चेति । "नेह नानाऽस्ति किं चने"त्यादिश्रुतिप्रतिपादितः प्रपञ्चाऽत्यन्ताभावः पारमार्थिकः । स चाऽधिष्ठानस्वरूपः । अधिष्ठानाऽतिरिक्त इति केचित् ।

घटाऽत्यन्ताभावो व्यावहारिकः । अयमेवाऽभेदप्रतियोगिको भूतले घटो नेत्यादिप्रतीतिविषयो भेद इत्युते । घटो नास्तीत्यादिविषयो ऽत्यन्ताऽभाव इत्युच्यते वादिभिः । सर्वो ऽप्यनित्य एव । सर्वस्य ब्रह्मज्ञाननिवर्त्त्यत्वात् ।

अन्ये तु लौकिकतन्त्रान्तरबुद्धिमनुसरन्तो ऽभावभेदं स्वीचक्रुः । तथा हि–प्रागभावप्रध्वंसाऽभावाऽत्यन्ताऽभावाऽन्योन्याऽभावभेदाच्चतुर्विधो ऽभावः ।

उत्पत्तेः प्राक्कारणे कार्याऽभावः प्रागभावः । यथा मृदादौ घटाद्यभावः ।

प्रतियोगिसमानाऽधिकरणाऽभावो ऽत्यन्ताभावः । यथा भूतलादौ घटाद्यभावः ।

प्रतियोगिसमानाधिकरणाऽभावो ऽन्योन्याभावः । यथा भूतलादौ घटभेदः । सर्वे ऽप्यभावा अनित्याश्चेति । एवमभावप्रमा निरूपिता ।

एवं षड्विधप्रमया साऽऽवरणमज्ञानं निवर्त्तते। तत्र परोक्षप्रमया ऽसत्त्वापादकमौढ्याऽज्ञाननिवृत्तिः। अपरोक्षप्रमया ऽसत्त्वाभानाऽऽपादकाऽज्ञाननिवृत्तिः।

इति तत्त्वाऽनुसंधाने द्वितीयः परिच्छेदः ॥

अथ तृतीयः परिच्छेदः ।

भ्रमाऽभिन्नं ज्ञानमप्रमा । सा च द्विविधा, स्मृतिरनुभूतिश्चेति ।

संस्कारमात्रजन्यं ज्ञानं स्मृतिः । सा ऽपि द्विविधा, यथार्थाऽयथार्थभेदात् । यथार्था स्मृति रपि द्विविधा, अनात्मस्मृति,रात्मस्मृतिश्चेति ।

तत्र व्यवहारिकप्रपञ्चो मिथ्या दृश्यत्वाज्जडत्वातपरिच्छिन्नत्वात् शुक्तिरूप्यवदित्यनुमानसिद्धमिथ्यात्वाऽनुसंधानं यथार्थाऽनात्मस्मरणम् ।

तत्त्वमस्यादिवाक्यार्थाऽनुसंधानं यथार्थाऽऽत्मस्मरणम् ।

अयथार्था स्मृतिरापि द्विविधा, पूर्ववत् । प्रपञ्चस्य सत्यत्वाऽनुसंधानमयथार्थाऽनात्मस्मरणम् । मिथ्यावस्तुत्वात्तस्य अहंकारादिष्वात्मत्वाऽनुसंधानमात्मनि कर्तृत्वानुसंधानं वा ऽयथार्थात्मस्मरणम् । स्वप्नस्त्वनुभव एव, न स्मृतिरिति वक्ष्यते ।

स्मृतिभिन्नं ज्ञानमनुभूतिः । सा च द्विविधा, यथार्था ऽयथार्था चेति । यथार्थाऽनुभूतिः प्रमा । सा निरूपिता ।

बाधितविषया ऽनुभूतिरयथार्था । सापि द्विविधा, संशयो निश्चयश्चेति । एकस्मिन् धर्मिणि भासमानविरुद्धनानाकोटिकज्ञानं संशयः ।

एकस्मिन् धर्मिणि स्वाऽऽकारविरुद्धधर्मद्वयवैशिष्ट्याऽवगाहिज्ञानाऽविरुद्धज्ञानं संशय इति केचित् ।

स च द्विविधः । प्रमाणसंशयः प्रमेयसंशयश्चेति ।

तत्र प्रमाणगता ऽसंभावना प्रमाणसंशयः । यथा ऽनभ्यासदशायां जलोत्पन्नं जलज्ञानं प्रमाणं न वेति संशयः । स च प्रामाण्यनिश्चयान्निवर्त्तते । प्रामाण्यनिश्चयस्तु स्वत एव ।

प्रामाण्यं नाम तद्वति तत्प्रकारकत्वम् । स्वतस्त्वं नाम यावत्स्वाऽऽश्रयग्राहकग्राह्यत्वम् । स्वाश्रयो वृत्तिज्ञानं, तद्ग्राहकं साक्षिचैतन्यं, तेन तन्निष्ठप्रामाण्यं गृह्यते इति स्वतःप्रामाण्यम् ।

अप्रामाण्यं परतो गृह्यते । तच्च तदभाववति तत्प्रकारकत्वम् । तदभाववत्त्वस्य वृत्तिज्ञानाऽनुपनीतत्वेन साक्षिणा ग्रहीतुमशक्यतया परत एवाऽप्रामाण्यं गृह्यते ।

प्रामाण्यस्वतस्त्वपक्षे संशयो दोषवशादुपपद्यते, इत्ययं प्रमाणसंशयः । वेदान्ता अद्वितीये ब्रह्मणि प्रमाणं न वेति संशयः करणगता ऽसंभावना । सा च श्रवणेन निवर्त्तते। तच्च निरूपितम् । ादपि श्रवणं शारीरकप्रथमाऽध्यायपठनेन निष्पद्यते ।

प्रमेयगता ऽसंभावना द्विविधा, अनात्मगता आत्मगता चेति । स्थाणुर्वा पुरुषो वेत्यनात्मसंशयः ।

आत्मसंशयो ऽनेकविधः । तथा हि—ब्रह्माऽद्वितीयं सद्वितीयं वा, अद्वितीयत्वेपि आनन्दगुणकं वा आनन्दस्वरूपं वे, त्यादि परमात्मगतः संशयः ।

आत्मा देहाद्यतिरिक्तो वा न वा, देहाद्यतिरिक्तत्वे ऽपि कर्त्ता वा अकर्त्ता वा, अकर्त्तृत्वेपि चिद्रूपो वा ऽचिद्रूपो वा, चिद्रूपत्वेपि आनन्दात्मको वा न वे,त्यादि जीवगतः संशयः। जीवस्य सच्चिदानन्दरूपत्वे ऽपि परमात्मना सहैक्यं संभवति न वा, ऐक्येपि तज्ज्ञानं मोक्षसाधनं न वा, मोक्षसाधनत्वेपि तज्ज्ञानं कर्मसमुच्चितं मोक्षसाधनं वा, केवलं ज्ञानं वे,त्यैक्यगतसंशयः । अयं सर्वोपि संशयो मननेन तर्कात्मकेन निवर्त्तते ।

तर्को नामाऽनिष्टप्रसङ्गः।व्याप्याऽऽरोपेण व्यापकाऽऽपादानमिति यावत् । व्याप्त्याश्रयो व्याप्यम् । व्याप्तिनिरूपकं व्यापकम् । तथा च यदि प्रपञ्चः सत्यः स्यात्तर्हि अद्वितीयश्रुतिवि-

रोधः स्यात्। यदि परमात्मा जीवभिन्नः स्यात्तर्हि घटादिवद-नात्मत्वेनाऽनित्य एव स्यात्। यद्यात्मा ऽऽनन्दो न स्यात्तर्हि कोपि न व्याप्रियेतेत्यादिव्याप्यारोपेण व्यापकप्रसञ्जनरूपा-स्तर्काः श्रुत्युक्ता द्रष्टव्याः। एतच्च निरूपितम्। एतन्मननं शारीरकद्वितीयाऽध्यायपठनेन निष्पद्यते।

संशयविरोधि ज्ञानं निश्चयः। स च द्विविधः, यथार्थो ऽयथा-र्थश्चेति। अविसंवादी यथार्थनिश्चयः। स चोक्त एव।

विसंवाद्ययथार्थनिश्चयः। स च द्विविधः। तर्को विपर्य-यश्चेति। तर्कस्तूक्त एव। विपर्ययो मिथ्याज्ञानम्। अतस्मिंस्त-द्बुद्धिरिति यावत्। स च द्विविधः, निरुपाधिकः सोपाधिकश्चेति। तत्राद्यो द्विविधः। बाह्य आभ्यन्तरश्चेति। शुक्त्यादाविदं रज-तमित्यादि बाह्यः। अहमज्ञो ब्रह्म न जानामीत्याद्याभ्यन्तरः।

सोपाधिको द्विविधः, बाह्य आभ्यन्तरश्चेति। लोहितः स्फटिक इत्यादि बाह्यः। आकाशादिप्रपञ्चभ्रमोपि बाह्यः। सो-पाधिकः कर्माऽविद्याकार्यत्वात्तत्त्वज्ञानिनो निवृत्ते ऽप्यज्ञाने प्रार-ब्धक्षयपर्यन्तं प्रपञ्चोपलब्धिदर्शनात् कर्तृत्वादिभ्रम आन्तरः।

स्वप्नो ऽप्याभ्यन्तरः सोपाधिकभ्रम एव, न तु स्मृतिः। तथा हि—जाग्रद्भोगप्रदकर्मोपरमे सति स्वप्नभोगप्रदकर्मोद्रेके सकलविषयेन्द्रियादिवासनावासितं निद्रादोषोपप्लुतमन्तःक-रणं रथादिविषयाऽऽकारेण ग्राहकेन्द्रियाद्याकारेण रथादिविष-याकारवृत्त्याकारेण च परिणमते। अन्तःकरणोपहितसाक्षी स्वयमन्याऽनवभास्यस्तत्सर्वमवभासयति। अतः स्वप्ने साक्षिणः स्वप्रकाशत्वं सुविज्ञेयम्। जाग्रदवस्थायां सूर्यादितेजोभिः संकी-र्णत्वात् साक्षिणः स्वप्रकाशत्वं दुर्विज्ञेयम्। स्वप्ने तु सूर्या-दीनां जाग्रत्पदार्थानामुपरतत्वात्स्वयंप्रकाशत्वं विवेक्तुं शक्यते।

तथा च श्रुतिः "स यत्र प्रस्वपित्यस्य लोकस्य सर्वतो मात्रामुपादाय स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपित्यत्रायं पुरुषः स्वयंज्योतिर्भवति न तत्र रथा न रथयोगा न पन्थानो भवन्ति अथ रथान् रथयोगान् पथः सृजते" इत्यादिः। स्वयंज्योतिः स्वयंप्रकाशश्चैतन्याऽविषय इति यावत्॥ एवं स्वप्नो ऽनुभवरूप एव न स्मृतिः। अन्यथा रथं पश्यामीत्यनुभवविरोधप्रसङ्गात्। स्वप्नपदार्थानामन्तःकरणमायाद्वारा शुद्धचैतन्याऽध्यस्तत्वेन इदानीं तत्साक्षात्काराऽभावेन बाधाऽभावेपि सोपाधिकतयोपाधिनिवृत्त्या तन्निवृत्तिरिति न जाग्रदवस्थायामनुवृत्तिः। कार्यनिद्रोपप्लुतमन्तःकरणमुपाधिः।

केचित्तु स्वप्नाऽध्यासं निरुपाधिकं वदन्ति। तत्र विरोधिजाग्रत्प्रत्ययेन तन्निवृत्तिः।

पुनश्च विपर्ययः प्रकारान्तरेण द्विविधः। अन्तःकरणवृत्तिरूपो ऽविद्यावृत्तिरूपश्चेति। स्वप्नादिरन्तःकरणवृत्तिरूपः। रजतादिभ्रमो ऽविद्यावृत्तिरूपः। संशयस्त्वविद्यावृत्तिरेव। तत्रैवं सति निरुपाधिकविपर्ययो निदिध्यासनेन निवर्त्तते। सोपाधिकस्तूपाधिनिवृत्त्या। निदिध्यासनं निरूपितमेव। तदपि शारीरकतृतीयाऽध्यायपठनेन निष्पद्यते।

एवं च श्रवणमनननिदिध्यासनैरसंभावनाविपरीतभावनानिवृत्तावसत्यन्यस्मिन्प्रतिबन्धे तत्त्वमस्यादिवाक्यादहं ब्रह्मास्मीति अपरोक्षप्रमा जायते। तदुक्तम् "ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात्" इति।

प्रतिबन्धस्त्रिविधः। भूतभाविवर्त्तमानभेदात्। भूतप्रतिबन्धः पूर्वाऽनुभूतविषयस्याऽऽवेशेन पुनः पुनः स्मरणम्। तदुपाधिकब्रह्माऽनुसंधानेन तन्निवृत्तिः। यथा भिक्षोः पूर्वाऽनुभूतमाहिष्यादिस्मर-

णेन तत्त्वज्ञानानुत्पत्तौ गुरूपदिष्टतदुपाधिकब्रह्माऽनुसंधानेन तन्निवृत्तिरिति वदन्ति ।

भाविप्रतिबन्धो द्विविधः । प्रारब्धशेषो ब्रह्मलोकेच्छा चेति ।

तत्र प्रारब्धकर्म द्विविधम् । फलाऽभिसंधिकृतं केवलं चेति । तत्र फलाऽभिसंधिकृतं फलं दत्त्वैव न श्यति । तस्मिन् सति ज्ञानं नोत्पद्यते । तस्य प्रबलत्वात् । तथा चश्रुतिः "स यथाकामो भवति तथाक्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत् कर्म कुरुते तदभिसंपद्यते" इति । तादृशप्रारब्धशेषो भाविप्रतिबन्धः केवलं प्रारब्धतत्त्वज्ञानहेतुः पापनिवृत्तिद्वारा । तथा च श्रुतिस्मृती "धर्मेण पापमपनुदति" "ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्मण" इति । "कषाये कर्मभिः पक्के ततो ज्ञानं प्रवर्त्तते" इति च । एवं च भाविप्रतिबन्धस्य प्रारब्धशेषस्य भोगेनाऽनिवृत्तौ सत्यपि श्रवणादौ न ज्ञानोदयः । यथाहुः "एकेन जन्मना क्षीणो भरतस्य त्रिजन्मभि"रिति ।

ब्रह्मलोकेच्छाया ब्रह्मसाक्षात्करोत्पत्तिप्रतिबन्धकत्वं विद्यारण्यस्वामिनो वदन्ति स्म—

ब्रह्मलोकाऽभिवाञ्छायां सम्यक् सत्यां निरुध्य ताम् ।
विचारयेद्यस्त्वात्मानं ननु साक्षात्करोत्ययम् ॥ इति ।

स पुनर्वेदान्तश्रवणादिमहिम्ना ब्रह्मलोकं गत्वा निर्गुणं ब्रह्म साक्षात्करोति । तथा च श्रुतिः "वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः, ते ब्रह्मलोके तु परान्तकाले परामृतात् परिमुच्यन्ति सर्वे" इति । स पुनस्तत्रैव मुच्यते ।

वर्त्तमानप्रतिबन्धं तन्निवृत्त्युपायं च विद्यारण्यस्वामिनो वर्णयांचक्रुः ।

प्रतिबन्धो वर्त्तमानो विषयाऽऽसक्तिलक्षणः ।
प्रज्ञामान्द्यं कुतर्कश्च विपर्ययदुराग्रहः ॥

शमाद्यैः श्रवणाद्यैर्वा तत्र तत्रोचितैः क्षयम्।
नीते ऽस्मिन्प्रतिबन्धे तु स्वस्य ब्रह्मत्वमश्नुते ॥ इति ।

ततश्च श्रवणादिभिः सकलप्रतिबन्धनिवृत्त्या वाक्याद् ब्रह्मसाक्षात्कारोत्पत्तौ शमदमोपरतितितिक्षाश्रद्धासमाधानानि अन्तरङ्गसाधनानि ।

अन्तरिन्द्रियनिग्रहः शमः। बाह्येन्द्रियनिग्रहो दमः। उपरतिः संन्यासः। तितिक्षा द्वन्द्वसहिष्णुता। श्रद्धा गुरुवेदान्तविश्वासः। समाधानं श्रवणादिषु चित्तैकाग्र्यम्। "शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वा आत्मन्येवात्मानं पश्ये"दित्यादि। सूत्रकारोप्याह "शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदङ्गतया तेषामवश्याऽनुष्ठेयत्वा"दिति ।

यज्ञादयो बहिरङ्गसाधनानि। "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा ऽनाशकेने"त्यादिश्रुतेः। "सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदि"त्यप्युक्तम्।

तदेवं मननादिसंस्कृतचित्तदर्पणसहकृतविचारितमहावाक्योत्पन्नेनाऽहं ब्रह्मास्मीत्यप्रतिबद्धब्रह्मसाक्षात्कारेणाऽज्ञाने निवृत्ते संचितकर्मणां नष्टत्वादागामिकर्मणामश्लेषात्प्रारब्धापादितविषयमनुभवन् मुमुक्षुरखण्डैकरससच्चिदानन्दब्रह्मात्मना ऽवतिष्ठते। एतादृशं फलं चतुर्थाऽध्यायपठनेन संभवतीति सांप्रदायिकानां रीतिः।

अन्ये तु गुरुमुखात्संपूर्णशास्त्रपठनं श्रवणं, तस्य पठितस्य युक्तिभिरनुसंधानं मननम्, तस्यैव पुनः पुनरावृत्तिर्निदिध्यासनम्, अनन्तरं साक्षात्कार इत्याहुः।

वस्तुतस्तु शुद्धसत्त्वानां मुख्याऽधिकारिणां व्युत्पन्नानामव्युत्पन्नानां च श्लोकेन श्लोकाऽर्द्धेन वा ब्रह्मक्षात्कारो भवत्येव ।

शब्दस्याऽचिन्त्यशक्तित्वात् । शास्त्रस्य शारीरकादेर्मुख्याधिकारि-विषयोपपत्तेः । तदुक्तं महाभारते—

आत्मानं विन्दते यस्तु सर्वभूतगुहाश्रयम् ।
श्लोकेन यदि वा ऽर्द्धेन क्षीणं तस्य प्रयोजनम् ॥ इति ।

सांप्रदायिकैरप्युक्तम् । " वाक्यश्रवणमात्रेण पिशाचवद-वाप्नुया"दिति ।

एतावानत्र विशेषः । अव्युत्पन्नानां परतन्त्रप्रज्ञत्वादसंभाव-नादिसंभवाद् ध्याननिष्ठा ऽपेक्षिता । तदुक्तं भगवता—

अन्ये त्वेवमजानन्तः श्रुत्वा ऽन्येभ्य उपासते ।
तेपि चाऽतितरन्त्येव मृत्युं श्रुतपरायणाः ॥ इति ।

विद्यारण्यैरप्युक्तम्—

अत्यन्तबुद्धिमान्द्याद्वा सामग्र्या वा ऽप्यसंभवात् ।
यो विचारं न लभते ब्रह्मोपासीत सो ऽनिशम् ॥ इति ।
"मरणे ब्रह्मलोके वा तत्त्वं ज्ञात्वा विमुच्यते" इति च ।

पतञ्जलिनाप्युक्तम् । "ततः प्रत्यक्चेतनाधिगमो ऽप्यन्तरा-याऽभावश्चे"ति ।

प्रमाणकुशलानां संशयादिग्रस्तानां पण्डितानामपि ध्या-ननिष्ठा ऽपेक्षिता। तदुक्तम् "अपि संराधने प्रत्यक्षानुमानाभ्या"-मिति । अन्यत्राऽप्युक्तम्—

बहुव्याकुलचित्तानां विचारात् तत्त्वधीर्न चेत् ।
योगो मुख्यस्ततस्तेषां धीदर्पस्तेन नश्यति ॥ इति ।

संशयादिरहितानां ध्याननिष्ठा चेत्स्याद् दृष्टं सुखम् । तदुक्तं भगवता—

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याऽभियुक्तानां योगक्षेमं वहाम्यहम् ॥

मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् ।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥ इति ।

न तु ज्ञानिनो ध्यानविधिः । देहाऽभिमानशून्यतया कर्त्तृत्वाऽभावेन तस्य विधिकिङ्करत्वाऽयोगात् । तदुक्तम् "अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिव"दिति । भाष्यकारैरप्युक्तम् "अहं ब्रह्मास्मीत्येतदवसाना एव सर्वे विधयः सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणीति देहेन्द्रियादिष्वहंममाभिमानहीनस्य प्रमातृत्वाऽनुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्ति"रिति ।

गौणमिथ्यात्मनो ऽसत्त्वे पुत्रदेहादिबाधनात् ।
तत्सद्ब्रह्माऽहमस्मीति बोधे कार्यं कथं भवेत् ॥ इत्युक्तम् ।

ज्ञानिनो ध्यानाऽभावे व्यवहारप्राचुर्य्याद् दृष्टदुःखमात्रं न मोक्षप्रतिबन्धः । तदुक्तं "तन्निष्ठस्य मोक्षोपदेशा"दिति । तस्मिन् ब्रह्मात्मनि निष्ठा अनन्यव्यापारतया परिसमाप्तिः पर्य्यवसानं यस्य स तथा तस्य, ज्ञानैकशरणस्येति यावत् । तथा भगवानप्याह—

य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह ।
सर्वथा वर्त्तमानोपि न स भूयो ऽभिजायते ॥
यस्य नाऽहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमान् लोकान् न हन्ति न निबध्यते ॥

शेषो ऽपि—

हयमेधशतसहस्राण्यथ कुरुते ब्रह्मघातलक्षाणि ।
परमार्थविन्न पुण्यैर्न च पापैः स्पृश्यते विमलः ॥ इति ।

विद्यारण्यैरप्युक्तम्—

पूर्णे बोधे तदन्यौ द्वौ प्रतिबद्धौ यदा तदा ।
मोक्षो विनिश्चितः किं तु दृष्टं दुःखं न नश्यति ॥ इति ।

बोधस्य पूर्णत्वाऽवधिर्विष्णुपुराणे पराशरेण दर्शितः—

अहं हरेः सर्वमिदं जनार्दनो
नान्यत्ततः कारणकार्यजातम् ।
ईदृङ्मनो यस्य न तस्य भूयो
भवोद्भवा द्वन्द्वगता भवन्ति ॥ इति ।

ब्रह्मगीतायां ब्रह्माणं प्रति शिवेनापि—

अहं हि सर्वं न च किं चिदन्य-
न्निरूपणायामनिरूपणायाम् ।
इयं हि वेदस्य परा हि निष्ठा
ममाऽनुभूतिश्च न संशयश्च ॥ इति ।

उपदेशसहस्रिकायामपि—

देहात्मज्ञानवद् ज्ञानं देहात्मज्ञानबाधकम् ।
आत्मन्येव भवेद्यस्य सो ऽनिच्छन्नपि मुच्यते ॥ इति ।

"अयमस्मीति पूरुष" इत्यत्राऽयमिति श्रुतेस्तात्पर्यप्रतिपादन-व्याजेन विद्यारण्यैरपि दर्शितं तृप्तिदीपे—

असंदिग्धाऽविपर्यस्तबोधो देहात्मताक्षये ।
तद्वदात्मनि निर्णेतुमयमित्युच्यते पुनः ॥ इति ।

सर्वथापि श्रवणादिना ब्रह्मसाक्षात्कार, स्ततो ब्रह्मभावलक्षणा मुक्तिर्भवतीति सिद्धम् । "तमेव विदित्वा ऽतिमृत्युमेति" "तरति शोकमात्मवित्" "ब्रह्मविद्ब्रह्मैव भवति" "एवमेवैष सम्प्रसादो ऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाऽभिनिष्पद्यते स उत्तमः पुरुषः" ।

आत्मानं चेद्विजानीयादयमस्मीति पूरुषः ।
किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत् ॥

"यत्पूर्णानन्दैकबोधस्तद्ब्रह्माहमस्मीति कृतकृत्यो भवती"ति ।
"एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारते"त्यादिश्रुतिस्मृतिभ्यः ।
शेषो ऽप्याह ।
वृक्षाग्राच्च्युतपादो यद्वदनिच्छन्नपि क्षितौ पतति ।
तद्वद्गुणपुरुषज्ञो ऽनिच्छन्नपि केवलीभवति ॥ इति ।

इति तत्त्वाऽनुसंधाने तृतीयः परिच्छेदः ॥

———oo———

अथ चतुर्थः परिच्छेदः ।

——:o:——

सा च मुक्तिर्द्विविधा, विदेहमुक्तिर्जीवन्मुक्तिश्चेति ।

तत्र तत्त्वज्ञानिनो भोगेन प्रारब्धकर्मक्षये वर्त्तमानशरीरपातो विदेहमुक्तिः । तदुक्तं "भोगेन त्वितरे क्षपयित्वा संपद्यते" इति ।

अन्ये तु भाविशरीराऽनारम्भो विदेहमुक्तिः । सा च ज्ञानोत्पत्तिसमकालैव । ज्ञानेनाऽज्ञाने निवृत्ते संचितकर्मणां नाशादागामिकर्मणामश्लेषाद्भोगेन प्रारब्धक्षयाच्छरीरान्तराऽऽरम्भकस्याऽसंभवात् भाविशरीराऽनारम्भस्य ज्ञानसमकालत्वं युज्यते । तदुक्तम्—

तीर्थे श्वपचगृहे वा नष्टस्मृतिरपि परित्यजन् देहम् ।
ज्ञानसमकालमुक्तः कैवल्यं याति हतशोकः ॥ इति ।

एवं वर्णयांचक्रुः । श्रवणादिभिरुत्पन्नसाक्षात्कारस्य विद्वत्संन्यासिनः कर्त्तृत्वाद्यखिलबन्धप्रतिभासनिवृत्तिर्जीवन्मुक्तिः । भोगप्रदप्रारब्धप्राबल्येपि योगाऽभ्यासेन तदभिभवात् प्रारब्धाऽपेक्षया योगाऽभ्यासस्य प्रबलत्वात् । अन्यथा पुरुषप्रयत्नवैयर्थ्येन चिकित्साशास्त्रमारभ्य मोक्षशास्त्रपर्यन्तस्याऽनारम्भप्रसङ्गात् । अत एव पुरुषप्रयत्नस्य साफल्यमाह वसिष्ठः—

आ बाल्यादलमभ्यस्तैः शास्त्रसत्संगमादिभिः ।
गुणैः पुरुषयत्नेन सो ऽर्थः संपाद्यते हितः ॥ इति ।

तत्र श्रुतिस्मृतीतिहासपुराणवचनानि प्रमाणानि । "विमुक्तश्च विमुच्यते" इति श्रुतिः ।

यो जागर्त्ति सुषुप्तिस्थो यस्य जाग्रन्न विद्यते ।
यस्य निर्वासनो बोधः स जीवन्मुक्त उच्यते॥इति वासिष्ठे ।

प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान्।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते॥
अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च।
निर्ममो निरहंकारः समदुःखसुखः क्षमी॥
संतुष्टः सततं योगी यतात्मा दृढनिश्चयः।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः॥

इत्यत्र जीवन्मुक्तभक्त उच्यते।

प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डवे"त्यारभ्य "गुणातीतः स उच्यते" इत्यन्तेन जीवन्मुक्तो दर्शितः।

निराशिषमनारम्भं निर्नमस्कारमस्तुतिम्।
अक्षीणं क्षीणकर्माणं तं देवा ब्राह्मणं विदुः॥इति महाभारते।

यथा स्वप्नप्रपञ्चोऽयं मयि मायाविजृम्भितः।
एवं जाग्रत्प्रपञ्चोऽयं मयि मायाविजृम्भितः॥ इति।
"यो वेद वेदवेदान्तैः सोऽतिवर्णाश्रमी भवेत्॥इति पुराणे।

सेयं जीवन्मुक्तिस्तत्त्वज्ञानवासनाक्षयमनोनाशाऽभ्यासात् सिध्यति। उत्पन्नस्य तत्त्वज्ञानस्याऽभ्यासो नाम पुनः पुनः केनाऽप्युपायेन तत्त्वानुऽसंधानम्। तदुक्तम्—

तच्चिन्तनं तत्कथनमन्योन्यं तत्प्रबोधनम्।
एतदेव परं तत्त्वं ब्रह्माऽभ्यासं विदुर्बुधाः॥ इति।

यद्यपि तत्त्वज्ञानात् प्रागपि वासनाक्षयमनोनाशाभ्यासोऽपेक्षितस्तथापि विविदिषासंन्यासिन उपसर्जनभूतः सः, श्रवणाद्यभ्यास एव प्रधानः। विद्वत्संन्यासिनस्तु तत्त्वज्ञानाभ्यास उपसर्जनभूतो, वासनाक्षयमनोनाशाऽभ्यासः प्रधान इत्यविरोधः। कृतोपासनस्य मुख्याऽधिकारिणस्तदपेक्षाऽभावेपि अकृतोपास्तेरस्मदादेस्तदभावे चित्तविश्रान्त्यभावादुत्पन्नमपि तत्त्वज्ञानं विष-

याऽबाधात्प्रमारूपमज्ञाननिवर्त्तकमप्यसंभावनादिसंभवान्न सुकरमिति वासनाक्षयमनोनाशाऽभ्यासो ऽपेक्षितः ।

वासनासामान्यलक्षणं तद्विभागं तत्प्रयोजनं लक्षणं च वसिष्ठ आह–

दृढभावनया त्यक्तपूर्वाऽपरविचारणम् ।
यदादानं पदार्थस्य वासना सा प्रकीर्तिता ॥
वासना द्विविधा प्रोक्ता शुद्धा च मलिना तथा ।
मलिना जन्महेतुः स्याच्छुद्धा जन्मविनाशिनी ॥
जन्ममृत्युकरी प्रोक्ता मलिना वासना बुधैः ।
पुनर्जन्माऽङ्कुरं त्यक्त्वा स्थिता सम्भ्रष्टबीजवत् ॥
देहार्थं ध्रियते ज्ञातज्ञेया शुद्धेति चोच्यते ॥ इति ।

तत्र मलिनवासनाजन्महेतवो ऽनेकप्रकारा दर्शिताः—

लोकवासनया जन्तोर्देहवासनया ऽपि च ।
शास्त्रवासनया ज्ञानं यथावन्नैव जायते ॥ इति ।
दम्भो दर्पो ऽभिमानश्च क्रोधः पारुष्यमेव च ।
अज्ञानं चाऽभिजातस्य पार्थसम्पदमासुरीम् ॥ इति च ।

योषित्पुत्रादिविषयाऽभिलाषाश्च मलिनवासना द्रष्टव्याः । विवेकदोषदर्शनसत्सङ्गसन्निधित्यागप्रतिकूलवासनोत्पादनेन उक्तानां मलिनवासनानामन्तःकरणगतानामनुत्पादो वासनाक्षयाऽभ्यासः । तथैव वसिष्ठादिभिर्दर्शितम्–

दृश्याऽसम्भवबोधेन रागद्वेषादितानवे ।
रतिर्घनोदिता या तु बोधाऽभ्यासं विदुः परम् ॥ इति ।
असङ्गव्यवहारित्वाद्भवभावनवर्जनात् ।
शरीरनाशदर्शित्वाद्वासना न प्रवर्त्तते ॥ इति च ।
नैष्कर्म्येण न तस्याऽर्थो न तस्याऽर्थो ऽस्ति कर्मभिः ।

न समाधानजप्याभ्यां यस्य निर्वासनं मनः ॥
आत्मा ऽसङ्गस्ततो ऽन्यत् स्यादिन्द्रजालमिदं जगत् ।
इत्यचञ्चलनिर्णीते कुतो मनसि वासना ॥ इति ।
दुःखं जन्मजरादुःखं मृत्युदुःखं पुनः पुनः ।
संसारमण्डलं दुःखं पच्यन्ते यत्र जन्तवः ॥ इति इतिहासे ।
निःसङ्गता मुक्तिपदं यतीनां
सङ्गादशेषाः प्रभवन्ति दोषाः ।
आरूढयोगोपि निपात्यते ऽधः
सङ्गेन योगो किमुता ऽल्पसिद्धिः ॥ इति विष्णुपुराणे ।
तथा भागवते ऽपि—
सङ्गं त्यजेत मिथुनव्रतिनां मुमुक्षुः
सर्वात्मना न विसृजेद्बहिरिन्द्रियाणाम् ।
एकश्चरेद्रहसि चित्तमनन्तईशे
युञ्जीत तद्व्रतिषु साधुषु चेत्प्रसङ्गः ॥ इति ।
स्त्रीणां तत्सङ्गिनां सङ्गं त्यक्त्वा दूरत आत्मवान् ।
क्षेमे विविक्त आसीनश्चिन्तयेन्मामतन्द्रितः ॥ इति च ।
महत्सेवां द्वारमाहुर्विमुक्ते-
स्तमोद्वारं योषितां सङ्गिसङ्गम् ।
महान्तस्ते समचित्ताः प्रशान्ता
विमन्यवः सुहृदः साधवो ये ॥ इति च ।
तत्सङ्गे पातित्वमाह—
योषिद्धिरण्याऽऽभरणाऽम्बरादि-
द्रव्येषु मायारचितेषु मूढः ।
प्रलोभितात्मा ह्युपभोगबुद्ध्या
पतङ्गवन्नश्यति नष्टदृष्टिः ॥ इति ।

प्रतिकूलवासना मैत्र्यादिवासनाः। ताश्च दर्शिताः "मैत्रीकरुणामुदितोपेक्षणां सुखदुःखपुण्याऽपुण्यविषयाणां भावनातश्चित्तप्रसादन"मिति। अस्यार्थः—सुखिप्राणिष्वेते मदीया इति मैत्रीं, दुःखिप्राणिषु यथा मम दुःखं मा भूदेवमन्येषामपि दुःखं मा भूदिति करुणां, पुण्यकारिषु पुरुषेषु मुदितां, पापिषूपेक्षां भावयतो रागद्वेषाऽसूयामदमात्सर्य्यादिनिवृत्त्या चित्तप्रसादो भवतीति।

तथा दैवसम्पदभ्यासेनाऽऽसुरसम्पन्नश्यति। दैवी सम्पद्भगवता दर्शिता "अभयं सत्त्वसंशुद्धि"रित्यारभ्य "भवन्ति सम्पदं दैवीमभिजातस्य भारते"त्यन्तेन। "अमानित्व"मित्यादिनोक्ताऽमानित्वादिधर्माभ्यासेन तद्विपरीतमानादयो नश्यन्ति। तथा च मैत्र्यादिवासनां सङ्कल्पपूर्वकमभ्यस्याऽनन्तरमजिह्वत्वादिधर्मानभ्यसेत्।

अजिह्वत्वादयो दर्शिताः—

अजिह्वः षण्ढकः पङ्गुरन्धो बधिर एव च।
मुग्धश्च मुच्यते भिक्षुः षड्भिरेतैर्न संशयः॥ इति।

इदमिष्टमिदं नेति यो ऽश्नन्नपि न सज्जते।
हितं सत्यं मितं वक्ति तमजिह्वं प्रचक्षते॥
अद्यजातां यथा नारीं तथा षोडशवार्षिकीम्।
शतवर्षां च यो दृष्ट्वा निर्विकारः स षण्ढकः॥
भिक्षार्थं गमनं यस्य विण्मूत्रकरणाय च।
योजनान्न परं याति सर्वथा पङ्गुरेव सः॥
तिष्ठतो व्रजतो वापि यस्य चक्षुर्न दूरगम्।
चतुर्युगां भुवं मुक्त्वा परिव्राट् सो ऽन्ध उच्यते॥
हिताऽहितं मनोरामं वचः शोकाऽऽवहं च यत्।
श्रुत्वाऽपि यो न शृणुते बधिरः स प्रकीर्त्तितः॥

सांनिध्ये विषयाणां च समर्थो ऽविकलेन्द्रियः ।
सुप्तवद्वर्त्तते नित्यं स भिक्षुर्मुग्ध उच्यते ॥ इति ।

तदनन्तरं चिन्मात्रवासनामभ्यसेत् ।

नामरूपात्मकस्य जगतश्चैतन्ये कल्पितत्वेन स्वतः सत्ताशून्यतया चैतन्यसत्तास्फुरणपूर्वकमेव स्फुरणं भवति । तत्र नामरूपे मिथ्यात्वनिश्चयेनोपेक्ष्य चिन्मात्रो ऽहमिति भावयेत् ।

सेयं चिन्मत्रवासना द्विप्रकारा, कर्तृकर्मकरणाऽनुसंधानपूर्विका केवला चेति । तत्र सर्वं जगच्चिन्मात्रमहं मनसा भावयामीति क्रियमाणा प्रथमा । सा संप्रज्ञातसमाधिकोटावन्तर्भवति । कर्तृकर्मकरणाऽनुसंधानरहिता चिन्मात्रो ऽहमिति भवना केवला। सर्वस्य चिन्मात्रत्वं शुक्रेण बलिं प्रत्युपदिष्टं—

चिदिहास्तीह चिन्मात्रं सर्वं चिन्मयमेव तत् ।
चित्त्वं चिदहमेवेति लोकाश्चिदिति संग्रहः ॥

द्वितीया ऽसंप्रज्ञातसमाधिकोटावन्तर्भवति । तस्यां चिन्मात्रवासनायां दृढाऽभ्यस्तायां पूर्वोक्ता मलिनवासना सर्वा क्षीयते। अयं वासनाक्षयाऽभ्यासः जतुसुवर्णादिवत्सावयवं कामादिवृत्तिरूपेण परिणममानमन्तःकरणं मननात्मकत्वान्मनः । तच्च सत्त्वरजस्तमोगुणात्मकं तदाश्रयत्वेन सत्त्वरजस्तमोविकाराणां सुखदुःखमोहादीनामुपलम्भात् रजस्तमोवृत्तिभिरुपचीयमनमन्तःकरणं पीनमात्मदर्शनाऽयोग्यं भवतीत्यतस्तदर्थं वृत्तिनिरोधनेन सूक्ष्मताऽऽपादनं मनसो नाश इत्युच्यते ।

तत्साधनानि दर्शितानि—

अध्यात्मविद्याऽधिगमः साधुसंगम एव च ।
वासनासंपरित्यागः प्राणस्पन्दनिरोधनम् ।
एतास्तु युक्तयः पुष्टाः सन्ति चित्तजये किल ॥

प्राणनिरोधोपायो दर्शितः—

प्राणायामदृढाऽभ्यासाद्युक्त्या च गुरुदत्तया ।

आसनाऽशनयोगेन प्राणस्पन्दो निरुध्यते ॥ इति ।

प्राणायामप्रकारो दर्शितः—

इडया पिब षोडशभिः पवनं

चतुरुत्तरषष्टिकमौदरिकम् ।

त्यज पिङ्गलया शनकैः शनकै-

र्दशभिर्दशभिर्दशभिर्व्यधिकैः ॥ इति ।

इडया वामनासिकया पिब पूरय, त्यज रेचय पिङ्गलया दक्षिणनासिकयेत्यर्थः ।

प्राणायामस्य मनोनाशोपायत्वं श्रुतावप्युक्तम्—

प्राणान् प्रपीड्येह सुयुक्तचेष्टः

क्षीणे प्राणे नासिकयोच्छ्वसीत ।

दुष्टाश्वयुक्तमिव वाहमेनं

विद्वान्मनो धारयेताप्रमत्तः ॥ इति ।

आसनयोगं तत्साधनं तत्फलं च पतञ्जलिरसूत्रयत् "तत्र स्थिरसुखमासनं, प्रयत्नशैथिल्याऽनन्तसमापत्तिभ्याम्"। प्रयत्नशैथिल्यं लौकिकवैदिककर्मत्यागः। फणानां सहस्रेण धरणीं धृत्वा योनन्तो वर्त्तते स एवाऽहमस्मीत्यनुसंधानम् अनन्तसमापत्तिः। अनयाऽऽसनप्रतिबन्धकं दुरितं क्षीयते। "ततो द्वन्द्वाऽनभिघातः"। आसनाऽभ्यासस्य फलं द्वन्द्वनिवृत्तिः ।

आसनयोगो ऽपि दर्शितः—

द्वौ भागौ पूरयेदन्नैर्जलेनैकं प्रपूरयेत् ।

मारुतस्य प्रचारार्थं चतुर्थमवशेषयेत् ॥ इति ।

एवं प्राणायामादिना प्राणस्पन्दे निरुद्धे ऽखिलाश्चित्तवृत्तयो निरुध्यन्ते, प्राणस्पन्दाऽऽधानत्वाच्चित्तवृत्त्युदयस्य। ततश्च स्वभा-

वत आत्माऽनात्माकारमन्तःकरणमनात्माकारवृत्तिनिरोधादात्मैकाकारं भवति। यथाहुः—

आत्माऽनात्माकारं स्वभावतो ऽवस्थितं सदा चित्तम्।
आत्मैकाकारतया तिरोहिताऽनात्मदृष्टि विदधीत॥ इति।

अयमेव योगः। यथाहुः "योगश्चित्तवृत्तिनिरोध" इति।

तत्साधनं चाहुः "अभ्यासवैराग्याभ्यां तन्निरोध" इति। भगवानपि तत्रैव—

असंशयं महाबाहो मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते॥ इति।

वैराग्यं निरूपितम्।

निरोधो द्विविधः। संप्रज्ञातो ऽसंप्रज्ञातश्चेति।

कर्त्राद्यनुसंधानं विना चिन्मात्रलक्ष्यैकगोचरप्रत्ययप्रवाहः संप्रज्ञातसमाधिः। यथाहुः—

विलाप्य विकृतिं कृत्स्नां संभवव्यत्ययक्रमात्।
परिशिष्टं तु चिन्मात्रं सदानन्दं विचिन्तयेत्॥
ब्रह्माऽऽकारमनोवृत्तिप्रवाहो ऽहंकृतिं विना।
संप्रज्ञातसमाधिः स्याद् ध्यानाऽभ्यासप्रकर्षजः॥ इति।

अस्य संप्रज्ञातसमाधेरङ्गिनो यमादीन्यष्टाङ्गानि। तत्र यमनियमाऽऽसनप्राणायामप्रत्याहारा बहिरङ्गानि।

अहिंसासत्याऽस्तेयब्रह्मचर्याऽपरिग्रहा यमाः। अष्टाङ्गमैथुनवर्जनं ब्रह्मचर्यम्। यथा ऽऽहुः—

स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम्।
संकल्पो ऽध्यवसायश्च क्रियानिर्वृत्तिरेव च॥
एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः।
विपरीतं ब्रह्मचर्यमनुष्ठेयं मुमुक्षुभिः॥

सत्संगसन्निधित्यागदोषदर्शनतो भवेत् ॥ इति ।

अत एव स्त्रीणां संभाषणादिनिषेधो ऽपि मुमुक्षूणाम्—

न संभाषेत्स्त्रियं कां चित् पूर्वदृष्टां न च स्मरेत् ।

कथां च वर्जयेत्तासां न पश्येल्लिखितामपि ॥

इत्यादि स्मृतौ ।

शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः ।

आसनं निरूपितम् । तच्च पद्मस्वस्तिकादि अनेकप्रकारम् ।

रेचकपूरककुम्भकाः प्राणायामाः ।

इन्द्रियाणां विषयेभ्यो निवर्त्तनं प्रत्याहारः । एतेषु बहिरङ्गेषु जितेष्वन्तरङ्गेषु यत्नः कर्तव्यः ।

धारणाध्यानसमाधयः संप्रज्ञातसमाधेरन्तरङ्गसाधनानि ।

धारणा नाम मूलाधारमणिपूरकस्वाधिष्ठानाऽनाहताऽऽज्ञाविशुद्धचक्रदेशानामन्यतरस्मिन् प्रत्यगात्मनि वा चित्तस्य स्थापनम् । तदेकस्मरणमिति यावत् ।

ध्यानं नाम तत्र प्रत्ययैकतानता । लक्ष्यैकगोचरप्रत्ययप्रवाह इत्येतत् ।

प्रत्ययप्रवाहो द्विविधः । विजातीयप्रत्ययान्तरितस्तदनन्तरश्चेति । आद्यो ध्यानं, द्वितीयः समाधिः ।

सो ऽपि द्विविधः । कर्त्राद्यनुसंधानपूर्वकस्तद्रहितश्चेति । आद्यो ऽङ्गसमाधिः । द्वितीयो ऽङ्गी ।

संप्रज्ञातसमाध्युदये लयविक्षेपकषायरसास्वादाश्चत्वारो विघ्नाः सन्ति । लयो निद्रा । पुनः पुनर्विषयाऽनुसंधानं विक्षेपः । चित्तस्य रागादिना स्तब्धीभावः कषायः । समाध्यारम्भसमये सविकल्पकानन्दाऽऽस्वादो रसास्वादः । यथा हुः—

लये संबोधयेच्चित्तं विक्षिप्तं शमयेत् पुनः ।

सकषायं विजानीयाद् ब्रह्म प्राप्तं न चालयेत् ।
नाऽऽस्वादयेद्रसं तत्र निःसङ्गः प्रज्ञया भवेत् ॥ इति ।

अस्यार्थः—प्राणायामादिना लयाऽभिमुखं चित्तमुत्थापयेत् । दोषदर्शनब्रह्माऽनुसंधानादिना विक्षिप्तं चित्तं शमयेत् । ब्रह्म प्राप्तं चित्तं न चालयेत् । समाध्यारम्भसमये सविल्पकाऽऽनन्दं नाऽऽस्वादयेत् । किं तूदासीनो ब्रह्मप्रज्ञया युक्तो भवेदिति ।

एवं निर्विघ्नेन संप्रज्ञातसमाध्यभ्यासेनाऽऽत्मप्रसादमात्रे मनसि ऋतम्भरा प्रज्ञोदेति ।

अतीताऽनागतविप्रकृष्टव्यवहितसूक्ष्मवस्तुविषयं योगिप्रत्यक्षम् ऋतम्भरा प्रज्ञा । तामपि निरुद्ध्य समाधिमभ्यसतो गुणवैतृष्ण्यं परवैराग्यमुदेति । तच्च निरूपितम् । ततोऽप्य ऽभ्यासः कर्त्तव्यः ।

उत्साहप्रयत्नो ऽभ्यासः । यथाहुः "तत्र स्थितौ यत्नो ऽभ्यास" इति । तस्यापि निरोधे सर्वधीनिरोधो भवति । अयमेवाऽसंप्रज्ञातसमाधिः । न केवलं परवैराग्यादेव समाधिलाभः, किं त्वीश्वरप्रणिधानादपि । तथा चोक्तम् "ईश्वरप्रणिधानाद्वा, क्लेशकर्मविपाकाऽऽशयैरपरामृष्टः पुरुषविशेष ईश्वरः, तस्य वाचकः प्रणवः, तज्जपस्तदर्थभावन"मिति । एतदुक्तं भवति—ईश्वरप्रणिधानाद्वा समाधिलाभः । क्लेशादिभिरसंबद्धः सर्वज्ञः सर्वशक्तिरीश्वरः । ईश्वरस्याऽभिधायकः शब्दः प्रणवः ।

प्रणवजपो माण्डूक्योपनिषत्पञ्चीकरणतद्वार्त्तिकोक्तप्रकारेण, प्रणवाऽर्थाऽनुसंधानं च ईश्वरप्रणिधानम् ।

अथ वा "तद्यो ऽहं सो ऽसौ यो ऽसौ सो ऽह"मित्यत्र सशब्देन परमात्मोच्यते । अहंशब्देन प्रत्यगात्मोच्यते । अनयोः सामानाधिकरण्याद् ब्रह्मात्मैक्यमुच्यते । ततश्च सो ऽहमित्यस्य परमात्मा

ऽहमित्यर्थो यथा तथा प्रणवस्यापि । तथा हि—सो ऽहमित्यत्र सकारहकारयोर्लोपे कृते परिशिष्टयोः 'ओ अम्' इत्यनयोः सन्धि कृत्वोच्चारणे ओमिति शब्दो निष्पन्नः । तदुक्तम्—

सकारं च हकारं च लोपयित्वा प्रयोजयेत् ।
संधिं च पूर्वरूपाख्यं ततो ऽसौ प्रणवो भवेत् ॥ इति ।

ततश्च ओमित्यस्य शब्दस्य परमात्मा ऽहमित्यर्थः । सर्वथापि प्रणवजपप्रणवार्थाऽनुसंधानरूपेण ईश्वरप्रणिधानेन परमेश्वराऽनुग्रहात् समाधिलाभो भवत्येव ।

एवं समाध्यभ्यासेनाऽन्तःकरणस्याऽतिसूक्ष्मताऽऽपादनं मनोनाश इत्युच्यते । अनेन सूक्ष्मेण मनसा त्वंपदलक्ष्ये साक्षात्कृते महावाक्येन स्वस्य ब्रह्मत्वसाक्षात्कारो भवति । न केवलं समाधिनैव साक्षात्कारः, किं तु विवेकेनाऽपि भवति । अन्तःकरणतद्वृत्तीनामवभासको यश्चिदात्मा साक्षी तस्मिन् साक्षात्कृते वाक्याद् ब्रह्मसाक्षात्कारः संभवत्येव । तदाह—

द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानं च राघव ।
योगो वृत्तिनिरोधो हि ज्ञानं सम्यगवेक्षणम् ॥
असाध्यः कस्य चिद्योगः कस्य चिद् ज्ञाननिश्चयः ।
प्रकारौ द्वौ तदा देवो जगाद परमेश्वरः ॥ इति ।

ज्ञानं विवेकः । तृतीयाऽध्याये "इन्द्रियाणि पराण्याहु"रित्यारभ्य "कामरूपं दुरासद"मित्यन्तेन विवेकम्, षष्ठाऽध्याये योगं च "यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते" इति वासुदेवः सर्वज्ञो भगवान् द्वौ प्रकारौ जगादेति श्लोकार्थः । तदेवं तत्त्वज्ञानवासनाक्षयमनोनाशाऽभ्यासाज्जीवन्मुक्तिः सिध्यतीति सिद्धम् ।

तस्या जीवन्मुक्तेः पञ्च प्रयोजनानि सन्ति । ज्ञानरक्षा, तपो, विसंवादाऽभावो, दुःखनिवृत्तिः, सुखाऽऽविर्भावश्चेति ।

तत्रोत्पन्नब्रह्मसाक्षात्कारस्य पुंसः पुनः संशयविपर्ययाऽनुत्पादो ज्ञानरक्षा । तथा हि—ज्ञानिनां शुकराघवनिदाघादीनामिवाऽकृतोपास्तेर्ज्ञानिनो ऽस्मदादेश्चित्तविश्रान्त्यभावात्पुनः कदा चित् संशयविपर्ययौ भवेताम् । अज्ञानवत् तावपि मोक्षप्रतिबन्धकौ । तदाह भगवान् "अज्ञश्चाऽश्रद्दधानश्च संशयात्मा विनश्यती"ति । ततश्च जीवन्मुक्त्यभ्यासेन संभवति संशयविपर्ययनिवृत्तिः । ज्ञानरक्षा नाम प्रथमं प्रयोजनम् ।

चित्तैकाग्र्यं तपः ।

मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तपः ।

स ज्यायः सर्वधर्मेभ्यः स धर्मः पर उच्यते ॥ इति स्मरणात् ।

ज्ञानिनो जीवन्मुक्तस्याऽखिलवृत्तीनामनुदयान्निरङ्कुशं चित्तैकाग्र्यं संपद्यते, तदेव तपः । तच्च लोकसंग्रहाय भवति । तदुक्तं "लोकसंग्रहमेवापि संपश्यन्कर्त्तुमर्हसी"ति ।

संग्राह्यो लोकस्त्रिविधः । शिष्यो, भक्त,स्तटस्थश्चेति ।

तत्र सन्मार्गवर्त्ती शिष्यो गुरूपदिष्टमार्गेण श्रवणादिना ब्रह्म साक्षात्कुर्वन्मुच्यते । "आचार्यवान् पुरुषो वेद" "तस्य तावदेव चिरं यावन्न विमोक्ष्ये ऽथ संपत्स्ये" इति श्रुतेः ।

भक्तो ऽपि ज्ञानिनः पूजाऽन्नपानादिना ऽभीष्टं प्राप्नोति । तथा च श्रुतिः—

यं यं लोकं मनसा संविभाति
विशुद्धसत्त्वः कामयते यांश्च कामान् ।
तं तं लोकं जयते तांश्च कामान्
तस्मादात्मज्ञं ह्यर्चयेद् भूतिकामः ॥ इति ।

स्मृतिरपि-

यद्येको ब्रह्मविद् भुङ्क्ते जगत्तर्पयते ऽखिलम् ।

तस्माद् ब्रह्मविदे देयं यद्यस्ति वस्तु किं चन ॥ इत्यादि ।

तटस्थो द्विविधः । सन्मार्गवर्त्त्यसन्मार्गवर्त्ती चेति । तत्र सन्मार्गवर्त्ती मुक्तस्य सदाचारे प्रवृत्तिं दृष्ट्वा स्वयमपि तत्र प्रवर्त्तते । तदाह भगवान्—

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्त्तते ॥ इति ।

असन्मार्गवर्त्ती तु जीवन्मुक्तस्य दृष्टिपातेन सर्वपापैः प्रमुच्यते ।

तथा च स्मृतिः—

यस्याऽनुभवपर्य्यन्ता बुद्धिस्तत्त्वे प्रवर्त्तते ।
तद्दृष्टिगोचराः सर्वे मुच्यन्ते सर्वकिल्बिषैः ॥ इति ।

द्वेषिणस्तु ज्ञानिनो दुष्कृतं संभावितं गृह्णन्ति । तथा च श्रुतिः "तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्या"मिति । एवं जीवन्मुक्तस्य तपो लोकसंग्रहाय भवति। इति तपो नाम द्वितीयं प्रयोजनम् ।

जीवन्मुक्तस्य व्युत्थानदशायामसत्कृतनिन्दादिश्रवणेऽपि पाखण्डकृतनिष्ठुरादिदर्शनादावपि चित्तवृत्त्यनुदयाद्विसंवादो न भवति । यथा ऽऽहुः—

ज्ञात्वा वयं तत्त्वनिष्ठां ननु मोदामहे वयम् ।
अनुशोचाम एवाऽन्यान्न भ्रान्तैर्विवदामहे ॥ इति ।

विसंवादाऽभावो नाम तृतीयं प्रयोजनम् ।

दुःखनिवृत्तिर्द्विविधा । ऐहिकदुःखनिवृत्ति, रामुष्मिकदुःखनिवृत्तिश्चेति ।

तत्र ज्ञानेन भ्रान्तेर्निवृत्ततया योगाऽभ्यासेनाऽखिलवृत्तिनिरोधेन चित्तस्याऽऽत्मैकाकारतया ऐहिकसमस्तदुःखनिवृत्तिः प्रारब्धभोगे सत्यपि। तथा च श्रुतिः "आत्मानं चेद्विजानीया"दित्या-

दिना ऐहिकदुःखनिवृत्तिं मुक्तस्य दर्शयति। ज्ञानेनाऽज्ञाननिवृत्त्या संचिताऽऽगामिकर्मणामश्लेषविनाशाभ्यामामुष्मिकदुःखानामपि निवृत्तिः। तथा च श्रुतिः "एतं ह वाव न तपति किमहं साधु नाऽकरवं किमहं पापमकरवम्" इत्यादि। दुःखनिवृत्तिर्नाम चतुर्थं प्रयोजनम्।

मुक्तस्य ज्ञानयोगाभ्यासज्ञानतत्कृताऽऽवरणविक्षेपनिवृत्त्या बाधकाऽभावात्परिपूर्णब्रह्मानन्दाऽनुभवसुखाऽविर्भावः। इममेवार्थं श्रुतिर्दर्शयति—

समाधिनिर्धूतमलस्य चेतसो
निवेशितस्यात्मनि यत्सुखं भवेद्।
न शक्यते वर्णयितुं गिरा तदा
स्वयं तदन्तःकरणेन गृह्यते॥ इति।

सुखाऽऽविर्भावो नाम पञ्चमं प्रयोजनम्। एवं स्वरूपप्रमाणसाधनफलनिरूपणैः द्विधा मुक्तिर्निरूपिता।

तस्माद्ब्रह्मविज्जीवन्मुक्तो भोगेन प्रारब्धकर्मणि क्षीणे वर्त्तमानशरीरपातेऽखण्डैकरसब्रह्मानन्दात्मना ऽवतिष्ठते। "न तस्य प्राणा उत्क्रामन्ति अत्रैव समवलीयन्ते "ब्रह्मैव सन् ब्रह्माऽप्येति" "ब्रह्म वेद ब्रह्मैव भवति"

विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति॥
तद्भावभावमापन्नस्ततोऽसौ परमात्मना।
भवत्यभेदो, भेदश्च तस्याऽज्ञानकृतो भवेत्॥

इत्यादिश्रुतिस्मृतिशतेभ्यः। भगवान् सूत्रकारोऽप्याह "अस्मिन्नस्य च तद्योगं शास्तीति। तस्मादहं ब्रह्मास्मीति तत्त्वमस्यादिवाक्यजन्यज्ञानाद्ब्रह्मभावलक्षणो मोक्षो भवतीति सिद्धम्।

"न स पुनरावर्त्तते"

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥

इत्यादिश्रुतिस्मृतिभ्यः ।

श्रीमत्स्वयंप्रकाशाख्यगुरुणा करुणावशात् ।
उपदिष्टपरात्मैक्यं तत्त्वमावेदितं मया ॥

ब्रह्मेशविष्ण्वादिसमस्तदेवाः
स्वस्वाऽधिकारेषु विभीतचित्ताः ।
आज्ञावशाद्यस्य वसन्ति सर्वे
तं कृष्णमाद्यं शरणं प्रपद्ये ॥

या भारती शर्वविरिञ्चिविष्णु-
देवादिभिर्नित्यमुपास्यमाना ।
सदा ऽक्षमालाविलसत्कराग्रां
वाग्वादिनीं तां प्रणमामि देवीम् ॥

आकाशपुष्पमिव विश्वमहं निरीक्षे
मग्नो ऽस्मि नित्यसुखबोधरसाऽमृताब्धौ ।
प्रत्यञ्चमद्वयमनन्तसुखैकबोधं
साक्षात्करोमि पदभावनया गुरूणाम् ॥

यत्पादयुग्मकमलाश्रयणं विना ऽहं
संसारसिन्धुपतितः सुखदुःखभाक् स्याम् ।
यत्पादयुग्मकमलाऽऽश्रयणात् सुतीर्ण-
स्तद्देशिकाऽङ्घ्रिकमलं प्रणतो ऽस्मि नित्यम् ॥

परमसुखपयोधौ मग्नचित्तो महेशं
हरिविधिसुरमुख्यान् देशिकं देहिमात्रम् ।

११०५३

जगदपि न विजाने पूर्णसत्यात्मसंवित्-
सुखतनुरहमात्मा सर्वसंसारशून्यः ॥

यदुकुलवररत्नं कृष्णमन्यांश्च देवान्
मनुजपशुमृगादीन् ब्राह्मणादीन्न जाने ।
परमसुखसमुद्रे मज्जनात्तन्मयोऽहं
गलितनिखिलभेदः सत्यबोधैकरूपः ॥

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशानन्दसरस्वती-
पूज्यपादशिष्यभगवन्महादेवसरस्वतीमुनिविरचिते
तत्त्वाऽनुसंधाने चतुर्थः परिच्छेदः ।

समाप्तश्चाऽयं ग्रन्थः ॥

शुभं भवतु ।

9

बनारससंस्कृतसीरीज़नाम्नी वाराणसेयसंस्कृतपुस्तकावली ।

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावला नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य ।॥) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैर्यैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां १) मूल्यं प्रापणव्ययश्च =) देयं इति ॥

तत्र मुद्रिता ग्रन्थाः ।	रु०	आ०
सिद्धान्ततत्त्वविवेकः खण्डानि ५	५	०
अर्थसङ्ग्रह अंग्रेजीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्डानि १३	१३	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यम् सभाष्यं ख० ६	६	०
सांख्यकारिका चन्द्रिकाटीकागौडपादभाष्यसहिता	१	०
वाक्यपदीयम् खण्ड[illegible] (प्रथमभागः प्रथमद्वितीयकाण्डे		
पुण्यराजटीकासहित खण्ड ३		
ण्डम् हेलाराजटीकासहित खण्[illegible]		
रसगङ्गाधरः खण्डानि ९		
परिभाषावृत्तिः खण्डे २		
वैशेषिकदर्शनं किरणावलीटीकासंवलि[illegible]		
भाष्यसहितम् खण्डे २		
शिक्षासङ्ग्रहः खण्डानि ५		
नैष्कर्म्यसिद्धिः खण्डानि ४		
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसू[illegible]		
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम् खण्डानि[illegible]		
(बृहत्) वैयाकरणभूषणम् पदार्थदीपिकासहितम् ख[illegible]		
विवरणोपन्यासः सटीकवाक्यसुधासहितः खण्डे २		
तत्त्वदीपनम् (पञ्चपादिकाविवरणस्य व्याख्यानम्) ख[illegible]		
वेदान्तदीपः (श्रीभगवद्रामानुजाचार्यविरचितः) खण्डा[illegible]		
टुप्टीका खण्डानि ४		

पातञ्जलदर्शनम्।श्रीरामानंन्दयतिकृतमणिप्रभाऽऽख्यवृत्ति स० १ ०
व्याकरणमिताक्षरा । श्रीमदन्नंभट्टप्रणीता खण्डानि ६ ६ ०
रसमञ्जरी । व्यङ्ग्यार्थकौमुद्या प्रकाशेन च सहिता ख० ३ ३ ०
भेदधिकारः व्याख्यासहितः श्रीमदप्पयदीक्षितकृत उपक्रमप-
राक्रमसहितः खण्डे २ २ ०
बोधसारो नरहरिकृतः तच्छिष्यदिवाकरकृतटीकया स० ख०९ ९ ०
ब्रह्मसूत्रदीपिका श्रीमच्छङ्करानन्दभगवद्भिर्विरचिता । २ ०
दैवज्ञकामधेनुः अर्थात् प्राचीनज्योतिषग्रन्थः खण्डे २ २ ०
श्रीमदणुभाष्यम् । श्रीश्रीवल्लभाचार्यविरचितम् ।
गोस्वामिश्रीपुरुषोत्तमजी महाराजविरचितभाष्यप्रकाशाख्य-
व्याख्या समेतम् खण्डानि ५ ५ ०
तत्त्वशेखरः । श्रीभगवल्लोकाचार्यप्रणीतः । तथा–तत्त्वत्रयचुलुक-
संग्रहः । कुमारवेदान्ताचार्यश्रीमद्वरदगुरुविरचितः । १

ब्रजभूषण दास और कम्पनी
चांदनीचौक के उत्तर नई सड़क बनारस

वेदान्त